Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अथ

# पञ्चांग - पद्धतिः

प्रारभ्यते

प्रणेता—स्व० पं० श्रीवायुनन्दन मिश्रः

मास्टर खेलाड़ी लाल संकटाप्रसाद

फोन : ६३०१५] वाराणसी- १ [मूल्यम् ५-००

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

# पञ्चाङ्ग-पूजन-पद्धतिः

प्रणेता

स्व० पण्डित श्रीवायुनन्दनमिश्रः

संशोधकः - अशोक द्विवेदी

प्रकाशकः

**मास्टर खेलाड़ीलाल संकटा प्रसाद**

संस्कृत पुस्तकालय

कचौड़ीगली, वाराणसी-१

तृतीयसंस्करणम् ]    वि० संवत् २०४३    [ मूल्यम् ५-००

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.





# दो शब्द

सभी शुभ कार्यों एव यज्ञ-यागादि में पचाङ्गपूजन अनिवार्य रूपसे करने का शास्त्रीय विधान है और होता भी है। यद्यपि पंचाङ्ग-पूजन का उल्लेख अन्यान्य पुस्तकों में भी है, फिर भी स्वतन्त्र रूप में संक्षिप्त रूप से सर्वथा विशुद्ध पृथक् कोई पुस्तक अब तक प्रकाशित नहीं थी। इस अभाव की पूर्ति प्रस्तुत पञ्चाङ्ग-पूजन-पद्धति' से हो जाती है, यह निर्विवाद सिद्ध है।

प्रस्तुत 'पञ्चाङ्ग-पद्धति' के रचयिता, कर्मकाण्ड-साहित्य के अनेक ग्रन्थों के लेखक तथा सम्पादक, काशी के सुप्रसिद्ध कर्मकाण्डी वैदिक विद्वान् स्व० पण्डित श्रीवायुनन्दन मिश्र जी हैं। प्रस्तुत पुस्तक विद्वद्-वर्ग के लिए विशेष उपयोगी एवं महत्त्वपूर्ण सिद्ध हुई है, यह सर्वथा सुनिश्चित है।

इसमें स्वस्तिवाचन-मन्त्र, दीपपूजन, गणपतिपूजन, कलशस्थापन, पुण्याहवाचन, मातृकापूजन, जलमातृपूजन, स्थलमातृपूजन, द्वारमातृपूजन, घृतमातृकापूजन, नान्दीश्राद्ध आदि विषय दिये गये हैं।

प्रस्तुत पुस्तक बहुत दिनों से अप्राप्त थी, जिसकी प्रतीक्षा पाठकवर्ग बड़ी उत्सुकता के साथ कर रहे थे। हार्दिक प्रसन्नता है कि आज वही चिर-प्रतीक्षित पुस्तक आपके हाथों प्रस्तुत है।

कर्मकाण्ड-साहित्य के प्रमुख प्रकाशक 'मास्टर खेलाड़ीलाल संकटा प्रसाद, संस्कृत पुस्तकालय, कचौड़ीगली, वाराणसी' के अध्यक्ष महोदय को मैं हार्दिक धन्यवाद देता हूँ, जिन्होंने प्रस्तुत प्रकाशन द्वारा अनेक कर्मकाण्डियों एवं पौरोहित्य कर्म कराने वाले विद्वानों का महान् उपकार किया है।

गुरुपूर्णिमा
२१ जुलाई, १९८६ ई०

—आचार्य शिवदत्तमिश्र शास्त्री
सी.के. ५।२६ ए., भिखारीदास लेन, वाराणसी-1

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



## ❀ विषयानुक्रमणिका ❀


| विषयाः | पृष्ठाङ्काः | विषयाः | पृष्ठाङ्काः |
|---|---|---|---|
| मङ्गलाचरणम् | १ | मातृकापूजनम् | २५ |
| शान्तिमन्त्राः | १ | जलमातृपूजनम् | २८ |
| प्रधानसङ्कल्पः | ३ | स्थलमातृपूजनम् | २८ |
| दीपपूजनम् | ४ | द्वारमातृपूजनम् | २९ |
| गणपति पूजनम् | ५ | घृतमातृकापूजनम् | २९ |
| कलशस्थापनम् | ११ | साङ्कल्पिक-नान्दीश्राद्धम् | ३० |
| पुण्याहवाचनम् | १३ | | |


❀

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.





# ❀ पूजन-सामग्री ❀

केशर चन्दन रक्तचन्दन रोरी नारा अबीर बुक्का सिन्दूर पुष्पमाला दूर्वा तुलसी धूपबत्ती नैवेद्य छुहारापान सुपारी लौंग इलायची ऋतुफल कपूर यज्ञोपवीत लालवस्त्र श्वेत वस्त्र १ चौकी २ पीढ़ा कमण्डलु दूध दही घृत मधु शर्करा आचार्यवरणी धोती गमछा दुपट्टा पंचपात्र आचमनी आसन रूई सलाई दीया कसोंरा पत्तल

मातृकाओं को चढ़ाने हेतु जनानी धोती एवं देवताओं के लिये धोती दुपट्टा।

❀

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

श्रीगणेशाय नमः ॥ श्रीसरस्वत्यै नमः ॥ श्रीगुरुचरणकमलेभ्यो नमः ॥ अथ पञ्चाङ्गपद्धतिप्रारम्भः ॥ ततो मंगलाचरणम् ॥ शिवतनयवरिष्ठं सर्वकल्याणमूर्तिंमुभयफलसहस्तं शोभितं मोदकेन ॥ अरुणकुसुममालाव्यालयज्ञोपवीतं मम हृदयनिवासं श्रीगणेशं नमामि ॥ ततो यजमानः नित्यकर्म समाप्य स्वासने प्राङ्मुखोपाविश्य धतकुंकुमकेसरचंदनं वा तिलकं कृत्वा आचम्य प्राणानायम्य ॥ ॐ पवित्रेंस्थो वैष्णव्यौ सवितुर्व्वः प्रसव ऽउत्पुंनाम्यच्छिद्रेण पवित्रेंण सूर्य्यस्य रश्मिभिंः ॥ तस्यं ते पवित्रपते पवित्रंपूतस्य यत्कांमः पुने तच्छंकेयम् ॥ इति कुशपवित्रधारणं कृत्वा ॥ ॐ अपवित्रः पवित्रो वा सर्वावस्थां गतोपि वा ॥ यः स्मरेत्पुण्डरीकाक्षं स बाह्याभ्यन्तरः शुचिः ॥ इत्यात्मानं पूजासामग्रीं च संप्रोक्ष्य ॥ हस्ते अक्षतपुष्पाणि गृहीत्वा शान्तिमंत्रान्पठेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



तत्र मंत्राः ॥ ॐ आनों भद्राः क्रतंवो यन्तु व्विश्वतोदंब्धासो ऽअंपरीतास
ऽउद्भिदंः ॥ देवानो यथा सदामिद्वृधे ऽअसन्नप्रांयुवो रक्षितारों दिवेदिंवे ॥ १ ॥
देवानां भद्रा सुमतिर्ऋंजूयतान्देवानांꣳ रातिरभिनोनिवंर्त्तताम् ॥ देवानांꣳ
सख्यमुपंसेदिमाव्वयन्देवानआयुः प्रतिंरन्तुजीवसें ॥ २ ॥ तान्पूर्व्वयानिव्विदां-
हूमहेव्वयम्भगंम्मित्रमदिंतिन्दक्षंमस्रिधंम् ॥ अर्य्यमणं व्वरुंणꣳ सोमंमश्विना
सरंस्वतीनःसुभगामयंस्करत् ॥ ३ ॥ तन्नोव्वातोंमयोभुव्वांतुभेषजन्तन्मातापृं-
थिवीतत्पिताद्यौः ॥ तद्ग्रावांणःसोमसुतोंमयोभुवस्तदंश्विना शृणुतन्धिष्ण्यायुवम्
॥ ४ ॥ तमीशांनंजगंतस्तस्थुषस्पतिंन्धियंजिन्न्वमवंसेहूमहेव्वयम् ॥ पूषानो
यथाव्वेदंसामसंद्वृधेरंक्षितापायुरदंब्धःस्वस्तयें ॥ ५ ॥ स्वस्तिनऽइन्द्रोंव्वृद्धश्रंवाः



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वस्तिनं॑पूषाव्विश्ववेदाः ॥ स्वस्तिनस्तार्क्ष्योऽअरिष्टनेमिःस्वस्तिनोबृहस्पतिर्द्द-
धातु ॥ ६ ॥ पृषदश्वामरुतःपृश्निमातरःशुभंय्यावानोव्विदथेषुजग्मयः ॥ अग्नि-
र्जिह्वामनवः सूरचक्षसोव्विश्वेनोदेवा ऽअवसागमन्निह ॥ ७ ॥ भद्रंकर्णेभिः
शृणुयामदेवाभद्रंपश्येमाक्षभिर्य्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाᳬसस्तनूभिर्व्यशेम-
हिदेवहितंय्यदायुः ॥ ८ ॥ शतमिन्नुशरदो ऽअन्तिदेवायत्रानश्चक्राजरसन्तनू-
नाम् ॥ पुत्रासोयत्रपितरोभवन्तिमानोमद्ध्यारीरिषतायुर्गन्तोः ॥ ९ ॥ अदिति-
र्द्यौरदितिरन्तरिक्षमदितिर्म्मातासपितासपुत्रः ॥ विश्वेदेवा ऽअदितिः पञ्चजना
ऽअदितिर्ज्जातमदितिर्ज्जनित्वम् ॥ १० ॥ तम्पत्नीभिरनुगच्छेमदेवाः पुत्रैर्भ्रातृ-
भिरुतवाहिरण्यैः ॥ नाकङ्गृभ्णानाः सुकृतस्यलोकेतृतीयेपृष्ठे ऽअधिरोचनेदिवः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. ॥ ११ ॥ द्यौः शान्तिरन्तरिक्षꣳ शान्तिः पृथिवीशान्तिरापः शान्तिरोषधयः प.
२ शान्तिः ॥ वनस्पतयः शान्तिर्विश्वेदेवाः शान्तिर्ब्रह्मशान्तिः सर्वꣳशान्तिः
शान्तिरेवशान्तिः सामाशान्तिरेधि ॥ १२ ॥ यतोयतः समीहसेततोनो ऽअभ-
यङ्कुरु ॥ शन्नः कुरु प्रजाभ्योऽभयन्नः पशुभ्यः ॥ सुशान्तिर्भवतु ॥ ॐ
श्रीमन्महागणाधिपतये नमः ॥ ॐ लक्ष्मीनारायणाभ्यां नमः ॥ ॐ उमा-
महेश्वराभ्यां नमः ॥ ॐ वाणीहिरण्यगर्भाभ्यां नमः ॥ ॐ शचीपुरन्दराभ्यां
नमः ॥ ॐ मातृपितृचरणकमलेभ्यो नमः ॥ ॐ कुलदेवताभ्यो नमः ॥ ॐ
इष्टदेवताभ्यो नमः ॥ ॐ ग्रामदेवताभ्यो नमः ॥ ॐ स्थानदेवताभ्यो नमः ॥
ॐ वास्तुदेवताभ्यो नमः ॥ ॐ सर्वेभ्यो देवेभ्यो नमः ॥ ॐ सर्वेभ्यो ब्राह्मणे- २
भ्यो नमः ॥ पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ सुमुखश्चैकदन्तश्च कपिलो गज

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कर्णकः ॥ लम्बोदरश्च विकटो विघ्ननाशो विनायकः ॥ १ ॥ धूम्रकेतुर्गणाध्यक्षो भालचन्द्रो गजाननः ॥ द्वादशैतानि नामानि यः पठेच्छृणुयादपि ॥ २ ॥ विद्यारम्भे विवाहे च प्रवेशे निर्गमे तथा ॥ संग्रामे सङ्कटे चैव विघ्नस्तस्य न जायते ॥ ३ ॥ शुक्लाम्बरधरं देवं शशिवर्णं चतुर्भुजम् ॥ प्रसन्नवदनं ध्यायेत्सर्वविघ्नोपशान्तये ॥ ४ ॥ अभीप्सितार्थसिद्ध्यर्थं पूजितो यः सुरासुरैः ॥ सर्वविघ्नहरस्तस्मै गणाधिपतये नमः ॥ ५ ॥ सर्वमङ्गलमाङ्गल्ये शिवे सर्वार्थसाधिके ॥ शरण्ये त्र्यम्बके गौरि नारायणि नमोऽस्तु ते ॥ ६ ॥ सर्वदा सर्वकार्येषु नास्ति तेषाममङ्गलम् ॥ येषां हृदिस्थो भगवान्मङ्गलायतनं हरिः ॥ ७ ॥ लाभस्तेषां जयस्तेषां कुतस्तेषां पराजयः ॥ येषामिन्दीवरश्यामो हृदयस्थो जनार्दनः ॥ ८ ॥ विनायकं गुरुं भानुं ब्रह्मविष्णुमहेश्वरान् ॥ सरस्वतीम्प्रणम्यादौ सर्वकार्यार्थसिद्धये ॥ ९ ॥ तदेव लग्नं सुदिनं तदेव तारावलं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



चन्द्रबलं तदेव ॥ विद्याबलं दैवबलं तदेव लक्ष्मीपते तेङ्घ्रियुगं स्मरामि ॥ १० ॥ यत्र योगेश्वरः कृष्णो यत्र पार्थो धनुर्धरः ॥ तत्र श्रीर्विजयो भूतिर्ध्रुवा नीतिर्मतिर्मम ॥ ११ ॥ सर्वेष्वारम्भकार्येषु त्रयस्त्रिभुवनेश्वराः ॥ देवा दिशंतु नः सिद्धिं ब्रह्मेशानजनार्दनाः ॥१२॥ वक्रतुण्ड महाकाय कोटिसूर्यसमप्रभ ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ १३ ॥ जलाक्षतद्रव्यं चादाय संकल्पं कुर्यात् ॥ ॐ विष्णुः ३ अद्य श्रीब्रह्मणोह्नि द्वितीयप्रहरार्द्धे विष्णुपदे श्रीश्वेतवाराहकल्पे वैवस्वतमन्वन्तरे अष्टाविंशतितमे कलियुगे कलिप्रथमचरणे जम्बूद्वीपे भरतखण्डे भारतवर्षे आर्यावर्तैकदेशे अमुकक्षेत्रे भागीरथ्याः अमुकदिग्भागे विक्रमशके बौद्धावतारे अमुकनामसंवत्सरे श्रीसूर्ये अमुकायने अमुकऋतौ अमुकमासे अमुकपक्षे अमुकातिथौ अमुकवासरे अमुकनक्षत्रे अमुकराशिस्थिते चन्द्रे अमुकराशिस्थिते श्रीसूर्ये अमुकराशिस्थिते देवगुरौ शेषेषु ग्रहेषु यथायथा



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

राशिस्थानस्थितेषु सत्सु एवं ग्रहगुणगणविशेषणविशिष्टायां शुभपुण्यतिथौ अमुकगोत्रः अमुकशर्मा सपत्नीकोऽहं श्रीपरमेश्वरप्रीत्यर्थं ( मम सुतस्य सुताया वा अमुकसंस्कारं० ) वा अमुककर्माहं करिष्ये ॥ पुनः संकल्पः ॥ तदंगत्वेन गणपतिपूजनं स्वस्तिपुण्याहवाचनं मातृकापूजनं वसोर्द्धारापूजनं आयुष्यमंत्रजपं नान्दीश्राद्धमाचार्यादिवर्णान्यहं करिष्ये ॥तत्रादौ कर्मार्थं कर्मपात्रं कृत्वा ॥ तद्यथा ॥ आसने पात्रं पात्रे पवित्रम् ॥ ॐ पवित्रेस्थो वैष्णव्यौ सवितुर्व्वः प्रसवऽउत्पुनाम्यच्छिद्रेणपवित्रेणसूर्य्यस्यरश्मिभिः ॥ तस्यंतेपवित्रपतेपवित्रपूतस्ययत्कामः पुनेतच्छकेयम् ॥ ॐ इमम्मे वरुणश्रुधीहवमद्या च मृडय ॥ त्वामवस्युराचके ॥ कर्मपात्रे जलं पूरयित्वा ॥ ततो गंधपुष्पयवतुलसीदलानि च तूष्णीं क्षिपेत् ॥ पवित्रेणालोड्य ॥ वरो वरेण्यो वरदो वराहो धरणीधरः ॥ आयातु कर्मपात्रे-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



स्मिन्सर्वादित्तु भयापहम् ॥ ततो कर्मपात्रमभिमंत्रयेत ॥ ॐ यद्दैवादेवहेडनन्दे वांसश्चकृमाव्वयम् ॥ अग्निर्म्मातस्म्मादेनंसोव्विश्वान्न्मुञ्चत्त्वर्ठ०हंसः ॥ १ ॥ यदिदिवायदिनक्तमेनां ७ँ सिचकृमाव्वयम् ॥ व्वायुर्म्मातस्म्मादेनंसोव्विश्वां न्न्मुञ्चत्त्वर्ठ० हंसः ॥ २ ॥ यदिजाग्रद्यदिस्वप्नऽएनां ७ँ सिचकृमाव्वयम् ॥ सूर्व्योमातस्मादेनंसोव्विश्वान्न्मुञ्चत्वर्ठ०हंसः ॥ ३ ॥ ॐ आपोहिष्ठामयोभुवस्तानंऽऊर्ज्जेदंधातन ॥ महेरणायचक्षसे ॥ ४ ॥ इति कलशोदकेन पूजासम्भारान्संप्रोत्त्य ॥

## अथ दीपपूजनम् ।

भो दीप त्वं ब्रह्मरूपस्त्वंधकारनिवारकः ॥ इमां मया कृतां पूजां गृह्णंस्तेजः



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प्रवर्द्धय ॥ दीपाय नमः इति मंत्रेण गंधाक्षतपुष्पैः सम्पूज्य ॥ प्रार्थना ॥ भक्त्या दीपं प्रयच्छामि देवाय परमात्मने ॥ त्राहि मां निरयाद्घोराद्दीपज्योतिर्नमोस्तु ते ॥

## अथ गणपतिपूजनम् ।

ततो ध्यानम् ॥ श्वेताङ्गं श्वेतवस्त्रं सितकुसुमगणैः पूजितं श्वेतगन्धैः क्षीराब्धौ रत्नदीपैः सुरतरुविमले रत्नसिंहासनस्थम् ॥ दोर्भिः पाशांकुशेष्टाभयधृतिविशदं चन्द्रमौलिं त्रिनेत्रं ध्यायेच्छान्त्यर्थमीशं गणपतिममलं श्रीसमेतं प्रसन्नम् ॥ ॐ भू० सि० बु० साहि० गणपतये नमः ॥ गणपतिं ध्यायामि ॥ हे हेरम्ब त्वमेह्येहि ह्यम्बिकात्र्यम्बकात्मज ॥ सिद्धिबुद्धिपते त्र्यक्ष लक्षलाभपितुः पितः ॥ नागास्य नागहारस्त्वं गणराज चतुर्भुज ॥ भूषितः स्वायुधैर्दन्तपाशाङ्कुश-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. परश्वधैः ॥ आवाहयामि पूजार्थं रक्षार्थं च मम क्रतोः ॥ इहागत्य गृहाण त्वं प.
५ पूजां यागं च रक्ष मे ॥ ॐ गणानांन्त्वागणपतिंर्ठं॰ हवामहेप्रियाणांन्त्वाप्रिय-
पंतिर्ठं॰हवामहे ॥ निधीनान्त्वांनिधिपतिंर्ठं॰ हवामहे व्वसोमम ॥ आहंमजानि-
गर्भधमात्वमंजासिगर्भधम् ॥ ॐ भू॰ सि॰ गण॰ आवा॰ ॥ १ ॥ रम्यं
सुशोभनं दिव्यं सर्वसौख्यकरं शुभम् ॥ आसनं च मया दत्तं गृहाण परमेश्वर॥
ॐ वर्ष्मोंसिसमानानामुद्यतामिवसूर्यः ॥ इमन्तमभितिष्ठामियोमाकश्चाभिदा-
सति ॥ ॐ भू॰ सि॰ ग॰ आसनं स॰ ॥ २ ॥ उष्णोदकं निर्मलं च सर्वसौ-
गन्ध्यसंयुतम् ॥ पादप्रक्षालनार्थाय दत्तं ते प्रतिगृह्यताम् ॥ ॐ एतावांनस्य
महिमातो ज्यायाँश्च पूरुषः ॥ पादोस्य व्विश्वाभूतानि त्रिपादस्यामृतंन्दिवि ॥ ५
ॐ भू॰ सि॰ गण॰ पाद्य स॰ ॥ ३ ॥ ताम्रपात्रे स्थितं तोयं गंधपुष्पफला-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्वितम् ॥ ससुवर्णं ददाम्यर्घं गृहाण परमेश्वर ॥ त्रिपादूर्ध्वऽउदैत्पुरुषः पादोस्येहाभवत्पुनः ॥ ततो विष्वङ्व्यक्रामत्साशनानशनेऽअभि ॥ ॐ भू० सि० ग० अर्घं स० ॥ ४ ॥ विनायकं नमस्तुभ्यं त्रिदशैरभिवन्दितम् ॥ गङ्गोदकेन देवेश कुरुष्वाचमनं प्रभो ॥ ॐ इमम्मे वरुण श्रुधीहवमद्याचमृडय ॥ त्वामवस्युराचके ॥ ॐ भू० सि ग० आचमनं स० ॥ ५ ॥ कामधेनुसमुद्भूतं सर्वेषां जीवनं परम् ॥ पावनं यज्ञहेतुश्च पयः स्नानार्थमर्पितम् ॥ ॐ पयः पृथिव्याम्पयऽओषधीषु पयो दिव्यन्तरिक्षे पयोधाः ॥ पयस्वतीः प्रदिशः सन्तु मह्यम् ॥ ॐ भू० सि० ग० पय० स० ॥ शुद्धोदकस्नानं० ॥ पयसस्तु समुद्भूतं मधुराम्लं शशिप्रभम् ॥ दध्यानीतं मया देव स्नानार्थं प्रतिगृह्यताम् ॥ ॐ दधि-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



क्राव्णोंऽअकारिषं जिष्णोरश्वस्य व्वाजिनः ॥ सुरभिनो मुखाकरत्प्रणऽआयूंꣳ
षितारिषत् ॥ ॐ भू० सि० ग० दधिस्ना० ॥ शुद्धोदकस्नानं० ॥ नवनीत-
समुत्पन्नं सर्वसन्तोषकारकम् ॥ घृतं तुभ्यं प्रदास्यामि स्नानार्थं प्रतिगृह्यताम् ॥
ॐ घृतम्मिमिक्षे घृतमस्य योनिर्घृते श्रितो घृतम्वस्य धाम ॥ अनुष्वधमावह
मादयस्व स्वाहाकृतं वृषभवक्षिहव्यम् ॥ ॐ भू० सि० ग० घृतस्नानं० ॥
शुद्धोदकस्नानं स० ॥ पुष्परेणुसमुद्भूतं सुस्वादु मधुरं मधु ॥ तेजःपुष्टिकरं दिव्यं
स्नानार्थं प्रतिगृह्यताम् ॥ ॐ मधुव्वाताऽऋतायते मधुक्षरन्ति सिन्धवः ॥
माध्वीर्न्नः सन्त्वोषधीः ॥ मधुनक्तमुतोषसो मधुमत्पार्थिवꣳ रजः ॥ मधुद्यौ-
रस्तु नः पिता ॥ मधुमान्नो व्वनस्पतिर्म्मधुमाँऽअस्तु सूर्य्यः ॥ माध्वीर्ग्गावो



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भवन्तु नः ॥ ॐ भू० सि० ग० मधुस्नानं स० ॥ शुद्धोदकस्नानं स० ॥ इक्षुरससमुद्भूतां शर्करां पुष्टिदां शुभाम् ॥ मलापहारिकां दिव्यां स्नानार्थं प्रतिगृह्यताम् ॥ ॐ अपाꣳरसमुद्वयसꣳ सूर्य्येसन्तꣳ समाहितम् ॥ अपाꣳरसंस्ययोरसस्तम्वोगृह्णाम्युत्तममुपयामगृहीतोसीन्द्राय त्वाजुष्टङ्गृह्णाम्येषते योनिरिन्द्राय त्वाजुष्टतमम् ॥ ॐ भू० सि० ग० शर्करा० ॥ शुद्धोदक० ॥ चन्दनं मलयोद्भूतं कस्तूर्यादिसमन्वितम् ॥ उद्वर्तनं मया दत्तं गृहाण परमेश्वर ॥ ॐ अꣳशुनाते ऽअꣳशुः पृच्यतां परुषापरुः ॥ गन्धस्तेसोममवतुमदायरसो ऽअच्युतः ॐ भू० सि० ग० उद्वर्तनस्ना० ॥ गंगा च यमुना चैव गोदावरी सरस्वती ॥

२ नर्मदा सिन्धुकावेरी स्नानार्थं प्रतिगृह्यताम् ॥ ॐ आपोहिष्ठामयोभुवस्तानं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ऽऊर्ज्जेदंधातन ॥ महेरणायचक्षसे ॥ ॐ भू० सि० ग० शुद्धोदकस्नानं स० ॥ स्नानान्ते आचमनं स० ॥ सर्वभूषादिके सौम्ये लोकलज्जानिवारणे ॥ मयोपपादिते तुभ्यं वाससी प्रतिगृह्यताम् ॥ ॐ सुजातोज्ज्योतिषासहशर्म्मवरूथमासंदत्स्व÷ ॥ व्वासोऽ अग्नेव्विश्श्वरूपᳫं संव्ययस्वाव्विभावसो ॥ ॐ भू० सि० गणपतये नमः वस्त्रं समर्पयामि ॥ वस्त्रान्ते आचमनं स० ॥ नवभिस्तंतुभिर्युक्तं त्रिगुणं देवतामयम् ॥ उपवीतं मया दत्तं गृहाण परमेश्वर ॥ ॐ यज्ञोपवीतं परमं पवित्रं प्रजापतेर्यत्सहजं पुरस्तात् ॥ आयुष्यमग्र्यं प्रतिमुञ्च शुभ्रं यज्ञोपवीतं बलमस्तु तेजः ॥ ॐ भू० सि० गण० उपवीतं स० ॥ यज्ञोपवीतान्ते आचमनं० ॥ शीतवातोष्णसंत्राणं लज्जाया रक्षणं परम् ॥ देहालङ्करणं वस्त्रमतः शांतिं प्रयच्छ मे ॥ ॐ युवासुवासाः



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

परिवीतऽआगात्सऽउश्रेयान्भवतिजायमानः ॥ तन्धीरासः कवयऽउन्नयान्ति स्वाध्यो मनसादेवयन्तः ॥ ॐ भू० सि० ग० उपवस्त्रं स० ॥ उपवस्त्रान्ते आचमनं स० ॥ श्रीखण्डं चन्दनं दिव्यं गन्धाढ्यं सुमनोहरम् ॥ विलेपनं सुरश्रेष्ठ चन्दनं प्रतिगृह्यताम् ॥ ॐ त्वांगंन्धर्व्वाऽअंखनँस्त्वामिन्द्रस्त्वाम्बृहस्पतिः ॥ त्वामोंषधेसोमोराजांव्विद्वान्न्यक्ष्मांदमुच्च्यत ॥ ॐ भू० सि० ग० गंधं स० ॥ अक्षताश्च सुरश्रेष्ठ कुंकुमाक्ताः सुशोभनाः ॥ अक्षतान्प्रतिगृह्णीयाःसंकटं मे निवारय ॥ ॐ अक्षन्नमींमदन्तह्यवंप्प्रियाऽअंधूषत ॥ अस्तौंषतस्वभांनवोव्विप्प्रानविंष्ठयामतीयोजान्विन्द्रतेहरीं ॥ ॐ भू० सि० ग० अक्षतान्स० ॥ माल्यादीनि सुगन्धीनि मालत्यादीनि वै प्रभो ॥ मयाहृतानि पुष्पाणि पूजार्थं प्रतिगृह्यताम् ॥ ॐ ओषंधीः प्रतिंमोदद्ध्वंपुष्पंवतीः प्रसूंवरीः ॥ अश्श्वांऽइवसजित्वंरीव्वींरुधंः पार-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



यिष्णव÷ ॥ ॐ भू० सि० ग० पुष्पमालां समर्पयामि ॥ दूर्वाङ्कुरान्सुहरितानमृतान्मङ्गलप्रदान् ॥ आनीतांस्तव पूजार्थं गृहाण गणनायक ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्वे प्रतनु सहस्रेण शतेन च ॥ ॐ भू सि० ग० दूर्वाङ्कुरान्स० ॥ हरिद्राकुंकुमं चैव सिन्दूरादिसमन्वितम् ॥ सौभाग्यद्रव्यसंयुक्तं गृहाण परमेश्वर ॥ ॐ अहिरिव भोगैः पर्येति बाहुञ्ज्यायाहेतिम्परिबाधमानः ॥ हस्तघ्नो विश्वांव्वयुनानि व्विद्वान्पुमान्पुमांꣳसंपरिपातु व्विश्वतः ॥ ॐ भू० सि० ग० नानापरिमलद्रव्याणि स० ॥ वनस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः ॥ आघ्रेयः सर्वदेवानां धूपोऽयं प्रतिगृह्यताम् ॥ ॐ धूरसि धूर्व्व धूर्व्वन्तं धूर्व्व तं योऽस्मान्धूर्व्वति तं धूर्व्वयं व्वयं. धूर्व्वामः ॥ देवानामसि



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

व्वह्नितमर्ठ॰ सस्नितमं पप्रितमं जुष्टतमन्देवहूतमम् ॥ ॐ भू॰ सि॰ ग॰ धूपं स॰ ॥ साज्यं च वर्तिसंयुक्तं वह्निना योजितं मया ॥ दीपं गृहाण देवेश त्रैलोक्यतिमिरापहम् ॥ ॐ अग्निर्ज्योतिर्ज्योतिरग्निः स्वाहा सूर्य्यो ज्योतिर्ज्योतिः सूर्य्यः स्वाहा ॥ अग्निर्व्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा सूर्य्यो व्वर्च्चो ज्योतिर्व्वर्च्चः स्वाहा ॥ ज्योतिः सूर्य्यः सूर्य्यो ज्योतिः स्वाहा ॥ ॐ भू॰ सि॰ ग॰ दीपं स॰ ॥ हस्तौ प्रक्षाल्य ॥ शर्कराघृतसंयुक्तं मधुरं स्वादु चोत्तमम् ॥ उपहारसमायुक्तं नैवेद्यं प्रतिगृह्यताम् ॥ ॐ ये देवासो दिव्येकादशस्थ पृथिव्यामध्येकादशस्थ ॥ अप्सुक्षितो महिनैकादशस्थ ते देवासो यज्ञमिमञ्जुषध्वम् ॥ ॐ भू॰ सि॰ ग॰ नैवेद्यं स॰ ॥ उत्तरापोशनं स॰ ॥ हस्तप्रक्षालनार्थे जलं स॰ ॥ मुखप्रक्षालनार्थे जलं स॰ ॥ चंदनेन करोद्धर्त्तनं स॰ ॥ पूगीफलं महद्दिव्यं

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. नागवल्लीदलैर्युतम् ॥ एलालवङ्गसंयुक्तं ताम्बूलं प्रतिगृह्यताम् ॥ ॐ यत्पुरुषेण प.
१ हविषां देवा यज्ञमतन्वत ॥ वसन्तोस्यासीदाज्यङ्ग्रीष्म ऽइध्मः शरद्धविः ॥
ॐ भू० सि० ग० पूगीफलताम्बूलं स० ॥ हिरण्यगर्भगर्भस्थं हेम बीजं विभा-
वसोः ॥ अनन्तपुण्यफलदमतः शान्तिम्प्रयच्छ मे ॥ ॐ हिरण्यगर्भः समवर्त्त-
ताग्रे भूतस्य जातः पतिरेकऽ आसीत् ॥ सदाधार पृथिवीन्द्यामुतेमां कस्मै देवाय
हविषा विधेम ॥ ॐ भू० सि० ग० दक्षिणाद्रव्यं स० ॥ कदलीगर्भसम्भूतं कर्पूरन्तु
प्रदीपितम् ॥ आरार्तिकमहं कुर्वे पश्य मे वरदो भव ॥ ॐ आरात्रिपार्थिवꣳ
रजः पितुरप्रायिधामभिः ॥ दिवः सदाꣳसिबृहतीव्वितिष्ठसऽआत्वेषं वर्त्तते
तमः ॥ ॐ भू० सि० ग० कर्पूरनीराजनं स० ॥नानासुगन्धपुष्पाणि यथाकालो- १

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

द्भवानि च ॥ पुष्पाञ्जलि मया दत्तो गृहाण परमेश्वर ॥ ॐ यज्ञेनं यज्ञमं-
यजन्त देवास्तानि धर्म्माणि प्रथमान्यांसन् ॥ तेह नाकं महिमानंः सचन्त
यत्र पूर्वे साध्याः सन्ति देवाः ॥ ॐ भू० सि० ग० मंत्रपुष्पाञ्जलिं स० ॥
पदे पदे भ्यः परिपूजकेभ्यः सद्योऽश्वमेधादिफलं ददाति ॥ तां सर्वपापक्षयहेतु-
भूतां प्रदाक्षिणां ते परितः करोमि ॥ ॐ ये तीर्थानि प्रचरन्ति सृकाहस्ता
निषङ्गिणांः ॥ तेषांᳪ सहस्रयोजनेवधन्वांनितन्मासि ॥ ॐ भू० सि० ग०
प्रदक्षिणां स० ॥ ततो जलगंधाक्षतदूर्वापूगीफलपुष्पदक्षिणाताम्रपात्रे पालाश-
पुटके मृण्मयपात्रे वा गृहीत्वा ॥ रक्ष रक्ष गणाध्यक्ष रक्ष त्रैलोक्यरक्षक ॥
भक्तानामभयं कर्ता त्राता भव भवार्णवात् ॥ द्वैमातुर कृपासिन्धो षाण्मातुरा-
ग्रज प्रभो ॥ वरदस्त्वं वरं देहि वांछितं वांछितार्थद ॥ अनेन सफलार्घ्येण

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

सफलोऽस्तु सदा मम ॥ ॐ भू० सि० ग० विशेषार्घं स० ॥ प्रार्थना ॥ विघ्नेश्वराय वरदाय सुरप्रियाय लंबोदराय सकलाय जगद्धिताय ॥ नागाननाय श्रुतियज्ञविभूषिताय गौरीसुताय गणनाथ नमो नमस्ते ॥ भक्तार्त्तिनाशनपराय गणेश्वराय सर्वेश्वराय शुभदाय सुरेश्वराय ॥ विद्याधराय विकटाय च वामनाय भक्तप्रसन्नवरदाय नमो नमस्ते ॥ नमस्ते ब्रह्मरूपाय विष्णुरूपाय ते नमः ॥ नमस्ते रुद्ररूपाय करिरूपाय ते नमः ॥ विश्वरूपस्वरूपाय नमस्ते ब्रह्मचारिणे ॥ भक्तप्रियाय देवाय नमस्तुभ्यं विनायक ॥ लम्बोदर नमस्तुभ्यं सततं मोदकप्रिय ॥ निर्विघ्नं कुरु मे देव सर्वकार्येषु सर्वदा ॥ त्वां विघ्नशत्रुदलनेति च सुन्दरेति भक्तप्रियेति सुखदेति फलप्रदेति ॥ विद्याप्रदेत्यघहरेति च ये स्तुवन्ति तेभ्यो गणेश वरदो भव नित्यमेव ॥ अनया पूजया सिद्धिबुद्धिसहितो महागणपतिः साङ्गः सपरिवारः प्रीयताम् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

# अथ कलशस्थापनम् ॥

ॐ मही द्यौः पृथिवी चं न ऽइमं यज्ञं मिमिक्षताम् ॥ पिपृतान्नो-भरींमभिः ॥ इति भूमिं स्पृष्ट्वा ॥ ॐ ओषधयः समंवदन्त सोमेन सह राज्ञां ॥ यस्मैं कृणोतिं ब्राह्मणस्तर्ठ० राजन्पारयामसि ॥ इति धान्यं विकिरेत् ॥ ॐ आजिंघ्र कलशं मह्यात्वां व्विशंत्विन्दंवः ॥ पुनंरूर्ज्जा निवंर्त्तस्व सानंः सहस्रंन्धुक्ष्वोरुधांरा पयंस्वती पुनर्म्माविंशताद्रयिः ॥ इति धान्योपरि कलशं स्थापयेत् ॥ ॐ वरुंणस्योत्तम्भंनमसि व्वरुंणस्य स्कंभसर्ज्जंनींस्थो व्वरुं-णस्यऽऋतसदंन्यासि व्वरुंणस्यऽऋतसदंनमासिव्वरुंणस्यऽऋतसदंनमासींद ॥ इति कलशे जलं पूरयेत् ॥ ॐ अर्ठ०शुनांतेऽअर्ठशुःपृंच्यतांपरुंषापरुंः ॥ गन्धस्तेसोमं-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



मवतुमदायरसोऽअच्युतः ॥ इति कलशे गंधं क्षिपेत् ॥ ॐ याऽओषधीः पूर्व्वा जाता देवेभ्यस्त्रियुगम्पुरा ॥ मनैनुबभ्रूणामहꣳ शतं धामानि सप्त च ॥ इति कलशे सर्वौषधीन्क्षिपेत् ॥ ॐ काण्डात्काण्डात्प्ररोहन्ती परुषः परुषस्परि ॥ एवानो दूर्व्वे प्रतनु सहस्रेण शतेन च ॥ इति कलशे दूर्वाङ्कुरान्क्षिपेत् ॥ ॐ अश्वत्थेवो निषदनं पर्णेवोव्वसतिष्कृता ॥ गोभाजऽइत्किलासथयत्सनवथ पूरुषम् ॥ इति कलशे पञ्चपल्लवान्क्षिपेत् ॥ ॐ स्योनापृथिवि नो भवान्नृक्षरानिवेशनि ॥ यच्छानः शर्म्म सप्रथाः ॥ इति कलशे सप्तमृत्तिकां क्षिपेत् ॥ ॐ याः फलिनीर्याऽअफलाऽअपुष्पायाश्च पुष्पिणीः ॥ बृहस्पतिप्रसूतास्तानो मुञ्चन्त्वꣳहसः ॥ इति कलशे पूगीफलं क्षिपेत् ॥ ॐ परिवाजं-



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पातिः कांवरग्निर्हव्यान्यंक्रमीत् ॥ दधद्रत्नांनि दाशुषें ॥ इति कलशे पंचरत्नानि क्षिपेत् ॥ ॐ हिरण्यगर्भः समंवर्त्तताग्रें भूतस्यं जातः पतिरेकंऽ आसीत् ॥ सदांधार पृथिवीन्द्यामुतेमां कस्मैं देवायं हविषां विधेम ॥ इति कलशे हिरण्यं क्षिपेत् ॥ ॐ युवासुवासाः परिवीतऽ आगात्सऽउश्रेयान्भवति जायमानः ॥ तं धीरासः कवयऽउन्नयन्ति स्वाध्यो मनसा देवयन्तः ॥ इति युग्मवस्त्रेण कलशं वेष्टयेत् ॥ ॐ पूर्णादंर्व्वि परांपत सुपूंर्णा पुनरापंत ॥ व्वस्नेव विक्रींणावहाऽ इषमूर्ज्जंठं० शतक्रतो ॥ इति कलशोपरि पूर्णपात्रं न्यसेत् ॥ ॐ श्रीश्चंते लक्ष्मीश्च पत्न्यांवहोरात्रे पार्श्वे नक्षंत्राणि रूपमश्विनौ व्यात्तंम् ॥ इष्णन्निंषाणामुम्मंऽ इषाण सर्वलोकम्मंऽ इषाण ॥ इति पूर्णपात्रो-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



परि नारिकेलं संस्थाप्य ॥ हस्ते अक्षतान्गृहीत्वा वरुणमावाहयेत् ॥ ॐ तत्त्वांयामि ब्रह्मणा व्वंदंमानस्तदाशास्ते यजंमानो हविर्भिः ॥ अहेडमानो व्वरुणेहबोध्युरुंशर्ठं० समानऽआयुः प्रमोंषीः ॥ इति वरुणं साङ्गं सपरिवारं आवाहयामि ॥ ॐ मनोंजूतिर्जुंषतामाज्यंस्य बृहस्पतिर्यज्ञमिमं तंनोत्वरिंष्टंयज्ञर्ठं० समिमन्दंधातु ॥ विश्वेंदेवासंऽ इह मांदयन्तामोँ३म्प्रतिंष्ठ ॥ इति वरुणः साङ्गः सपरिवारः सुप्रतिष्ठितो वरदो भव ॥ अपां पतये वरुणाय नमः ॥ इति षोडशोपचारैः पंचोपचारैर्वा पूजयेत् ॥ ( केचित्तु प्रतिष्ठापूजनानन्तरं विष्णवाद्यावाहनम् ॥ केचित पूजनपश्चादावाहनम् ) ततो विष्णवाद्यावाहनम् ॥ कलशस्य मुखे विष्णुः कंठे रुद्रः समाश्रितः ॥ मूले त्वस्य स्थितो ब्रह्मा मध्ये मातृगणाः स्मृताः ॥ कुक्षौ तु सागराः सप्त सप्तद्वीपा च मेदिनी ॥ अर्जुनी गोमती चैव



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

चन्द्रभागा सरस्वती ॥ कावेरी कृष्णवेणा च गंगा चैव महानदी ॥ तापी
गोदावरी चैव माहेन्द्री नर्मदा तथा ॥ नदाश्च विविधा जाता नद्यः सर्वास्तथा-
परे ॥ पृथिव्यां यानि तीर्थानि कलशस्थानि तानि वै ॥ सर्वे समुद्राः सरितस्तीर्थानि
जलदा नदाः ॥ आयान्तु मम शान्त्यर्थं दुरितक्षयकारकाः ॥ ऋग्वेदोथ
यजुर्वेदः सामवेदो ह्यथर्वणः ॥ अङ्गैश्च सहिताः सर्वे कलशन्तु समाश्रिताः ॥

## अथ प्रार्थना ।

देवदानवसंवादे मथ्यमाने महोदधौ ॥ उत्पन्नोऽसि तदा कुम्भ विधृतो
विष्णुना स्वयम् ॥ १ ॥ त्वत्तोये सर्वतीर्थानि देवाः सर्वे त्वयि स्थिताः ॥
३ त्वयि तिष्ठन्ति भूतानि त्वयि प्राणाः प्रतिष्ठिताः ॥ २ ॥ शिवः स्वयं त्वमेवासि
विष्णुस्त्वं च प्रजापतिः ॥ आदित्या वसवो रुद्राः विश्वेदेवाः सपैतृकाः ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



त्वयि तिष्ठन्ति सर्वेऽपि यतः कामफलप्रदाः ॥ त्वत्प्रसादादिमं यज्ञं कर्तुमीहे जलोद्भव ॥ ४ ॥ सान्निध्यं कुरु मे देव प्रसन्नो भव सर्वदा ॥ नमो नमस्ते स्फटिकप्रभाय सुश्वेतहाराय सुमङ्गलाय ॥ सुपाशहस्ताय झषासनाय जलाधिनाथाय नमो नमस्ते ॥ पाशपाणे नमस्तुभ्यं पद्मिनीजीवनायक ॥ पुण्याहवाचनं यावत्तावत्त्वं सन्निधो भव ॥ इति प्रार्थना ॥

## अथ पुण्याहवाचनम् ।

अवनिकृतजानुमण्डलः कमलमुकुलसदृशमंजालिं शिरस्याधायानन्तरं वामान्वारब्धदक्षिणपाणिना स्वर्णपूर्णकलशं धारयित्वा प्रार्थयेत् ॥ दीर्घा नागा नद्यो गिरयस्त्रीणि विष्णुपदानि च ॥ तेनायुःप्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु ॥ इति यजमानः ॥ अस्तु दीर्घमायुरिति विप्राः ॥ ॐ त्रीणिं



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पदा विचंक्रमे विष्णुंर्गोपाऽअदांभ्यः ॥ अतो धर्म्माणि धारयंन् ॥ तेनायुः-प्रमाणेन पुण्यं पुण्याहं दीर्घमायुरस्तु इति यजमानः ॥ अस्तु दीर्घमायुः इति ब्राह्मणाः ॥ एवं द्विरपरं शिरसि भूमौ निधाय ॥ ब्राह्मणानां हस्ते जलादिकं दद्यात् ॥ तत्र मंत्रः ॥ अपां मध्ये स्थिता देवाः सर्वमप्सु प्रतिष्ठितम् ॥ ब्राह्मणानां करे न्यस्ताः शिवा आपो भवन्तु ते ॥ शिवा आपः सन्तु इति यजमानः ॥ सन्तु शिवा आपः इति ब्राह्मणाः ॥ लक्ष्मीर्वसति पुष्पेषु लक्ष्मीर्वसाति पुष्करे ॥ सा मे वसतु वै नित्यं सौमनस्यं तथास्तु नः ॥ सौमनस्यमस्तु इति यजमानः ॥ अस्तु सौमनस्यं इति ब्राह्मणाः ॥ अक्षतं चास्तु मे पुण्यं दीर्घमायुर्यशो बलम् ॥ यद्यच्छ्रेयस्करं लोके तत्तदस्तु सदा मम ॥ अक्षतं चारिष्टं चास्तु इति यजमानः ॥ अस्त्वक्षतमरिष्टं च इति ब्राह्मणाः ॥ पुनः गंधाः पान्तु इति यज० ॥ सुमङ्गल्यं चास्तु इति ब्रा० ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



अक्षताः पान्तु इति यज० ॥ आयुष्यमस्तु इति ब्रा० ॥ पुष्पाणि पान्तु इति यज० ॥ सौश्रियमस्तु इति ब्रा० ॥ ताम्बूलं पातु इति यज० ॥ ऐश्वर्यमस्तु इति ब्रा० ॥ फलं पातु इति यज० ॥ आरोग्यमस्तु इति ब्रा० ॥ दक्षिणाः पान्तु इति यज० ॥ बहु धनमस्तु इति ब्राह्म० ॥ ततो यजमानः ॥ श्रीर्यशो विद्या विनयो वित्तं बहु पुत्रं बहु धनं चायुष्यं चास्तु ॥ विप्राः तथास्तु ॥ यजमानः यं कृत्वा सर्ववेदयज्ञक्रियाकरणकर्मारम्भाः शुभाः शोभनाः प्रवर्त्तन्ते तमहं ॐकारमादिं कृत्वा ऋग्यजुःसामाथर्वाशीर्वचनं बहुऋषिमतं समनुज्ञातं भवद्भिरनुज्ञातः पुण्यं पुण्याहं वाचयिष्ये ॥ ब्राह्मणाः वाच्यताम् ॥ ॐ भद्रं कर्णेभिः शृणुयाम देवा भद्रं पश्येमाक्षभिर्यजत्राः ॥ स्थिरैरङ्गैस्तुष्टुवाꣳ

१. ऋक् ॥ द्रविणोदाद्रविणसस्तुरस्यंद्रविणोदासनंरस्य प्रयंसव ॥ द्रविणोदावीरवंतीमिषंन्नो-



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

संस्तनूभिर्व्यशेमहि देवहितं यदायुः ॥ १ ॥ द्रविणोदाः पिपीषति जुहोतप्रचतिष्ठत ॥ नेष्ट्राहतुभिरिष्यत ॥ २ ॥ सवितात्वासवानाᳬ सुवतामग्नि- र्गृहपतीनाᳬ सोमो व्वनस्पतीनाम् ॥ बृहस्पतिर्व्वाचऽइन्द्रो ज्यैष्ठ्याय रुद्रः पशु- भ्यो मित्रः सत्यो व्वरुणो धर्म्मपतीनाम् ॥ ३ ॥ न तद्रक्षाᳬसि न पिशाचास्त- रन्तिदेवानामोजः प्रथमजᳬ ह्येतत् ॥ यो विभर्ति दाक्षायणᳬ हिरण्यᳬ सदेवेषु

---

द्रविणोदारासतेदीर्घमायुः ॥ १ ॥ सवितापश्चात्तात्सवितापुरस्तात्सवितोत्तरात्तात्सविताधरात्तात् ॥ सवितानः सुवतु सर्वतातिं सवितानो रासतां दीर्घमायुः ॥ २ ॥ नवोनवो भवति जायमानोह्नांकेतु रुपसामित्यग्रं ॥ भागंदेवेभ्यो विदधात्यायन्प्रचन्द्रमास्तिरते दीर्घमायुः ॥ ३ ॥ उच्चादिवि दक्षिणावन्तो अस्थुर्येऽअश्वदाः सहते सूर्येण ॥ हिरण्यदा अमृतत्वं भजन्ते वासोदाः सोमप्रतिरन्त आयुः ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. १५ कृणुते दीर्घमायुः समनुष्येषु कृणुते दीर्घमायुः ॥ ४ ॥ उच्चातेंजातमन्धसो दिवि-
सद्भूम्यादंदे ॥ उग्रꣳ शर्म्ममहिश्रवः ॥ ५ ॥ उपास्मै गायता नरः पवमानायेन्दवे ॥ प. १५

यजुः ॥ भद्रंकर्णेभिः ॥ साम ॥ ॐ देवो ३ वो ३ द्रविणो दाः पूर्णा विवष्ट्वासिं चं ॥ उं द्रा १
सिश्चा २ ध्वमुपवा पृणध्वं । ओदिद्रो दे २ । वं उहते । इ डा २ ३ भा ३ ४ ३ ।
ॐ २ ३ ४ ५ इ । डा ॥ १ ॥ अधेनो देव सवितः । ॐ हो वा । इहे सुधायि ।
प्रजा वा २ ३ रसा । वीः सौभगाम् । परा दु २ ३ ष्वा ३ । हो वा ३ हा । प्रियो उसू
२ ३ ४ ५ वा ६ ५ ६ । दे क्षा ३ यो २ ३ ४ ५ ॥ २ ॥ चंद्रमा आ उवा । प्सुवा ता रा उवा ।
सुपर्णो धा उवा । व ते दिवि । न वो हिरा उवा । ण्य ना ई मा या उवा । पदं विं दा उवा ।
ति विद्युताः । वित्तंमा आउवा । स्य रो दा २ ३ सा ३ ४ ३ यि । ॐ २ ३ ४ ५ ई । डा ॥ ३ ॥
उच्चाता ३ इ जा त मंधसाः । दि वा इ सा १ द्भू २ । मि या २ ३ ददा ई । उग्रंङ शर्मा ।
महा २ ३ यि श्र वा उ । वा ३ । स्तौ षे २ ३ ४ ५ ॥ ४ ॥ उपा ५ स्मै । गा ३ या ३ ता
नाराः । पा ३ वा मा ३ ना । या २ ३ आ । हुम्माई । दा ३ वा ई । आभिदे वोङ्इया २ क्षं ता

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अभिदे॒वाँ२॥ऽइयंक्षते ॥ ६ ॥ व्रतजपनियमतपःस्वाध्यायक्रतुशमदमदयादान-विशिष्टानां सर्वेषां ब्राह्मणानां मनः समाधीयताम् इति यजमानः ॥ समाहित-मनसः स्मः इति ब्राह्मणाः ॥ प्रसीदन्तु भवन्तः इति यज० ॥ प्रसन्नाः स्मः इति ब्राह्म० ॥ ततः शांतिरस्त्विवति यजमानः । अस्त्विवति द्विजाः ॥ एवं वचनं प्रतिवचनं सर्वत्र दद्युः ॥ अंतः उदकसेकः ॥ ॐ शान्तिरस्तु ॥

---

उ । वा १ २ ३ ४ ५ ॥ अथर्व ॥ धा॒ता॒रा॒तिः सं॑वि॒तेदं जु॑षंतां प्र॒जाप॑ति॒र्नि॑धिप॑ति॒र्नो॑ऽअ॒ग्निः । त्वष्टा॒विष्णुः॑ प्र॒जाया॑ संर॒रा॒णो यज॑मानाय॒ द्रवि॑णं दधा॒तु ॥ १ ॥ अभ॑यं द्यावा पृथि॒वी इ॒हास्तु नो॒ऽभ॑यं॒ सोम॑ः सवि॒ता नः॑ कृणोतु ॥ अभ॑यं नो॒ स्त्वू॒र्वान्तरि॑क्षं सप्तऋ॒षीणां॑ च॒ ह॒विषाऽभ॑यं नो॒ऽअस्तु ॥ २ ॥ नवो॑ नवो॒ भवसि॒ जाय॑मा॒नोऽह्नां॑ के॒तु॒रु॒षसा॑मे॒ष्यग्र॑म् । भागं॒ दे॒वेभ्यो॒ वि द॑धा॒स्यायन्प्र च॑न्द्रमास्ति॒रते॒ दी॒र्घमायुः॑ ॥ ३ ॥ उच्चैर्घो॑षो दु॒न्दु॒भिः स॑त्व॒ नायन्वा॑नस्प॒त्यः सम्भृ॑त उ॒स्रिया॑भिः । वाचं॑क्षुणु॒वा नोद॒मयन्त्स॒पत्ना॑न् सिं॒ह इ॑व ज्ये॒ष्यन्न॒भि तं॑ स्तनीहि ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ॐ पुष्टिरस्तु ॥ ॐ तुष्टिरस्तु ॥ ॐ वृद्धिरस्तु ॥ ॐ अविघ्नमस्तु ॥ ॐ आयुष्यमस्तु ॥ ॐ आरोग्यमस्तु ॥ ॐ शिवमस्तु ॥ ॐ शिवं कर्मास्तु ॥ ॐ कर्मसमृद्धिरस्तु ॥ ॐ धर्मसमृद्धिरस्तु ॥ ॐ वेदसमृद्धिरस्तु ॥ ॐ शास्त्रसमृद्धिरस्तु ॥ ॐ धनधान्यसमृद्धिरस्तु ॥ ॐ पुत्रपौत्रसमृद्धिरस्तु ॥ ॐ इष्टसंपदस्तु ॥ ॐ अरिष्टनिरसनमस्तु ॥ बहिरुदकसेकः ॥ ॐ यत्पापं रोगमशुभमकल्याणं तद्दूरे प्रतिहतमस्तु ॥ अन्तरुदकसेकः ॐ यच्छ्रेयस्तदस्तु ॥ ॐ उत्तरे कर्मणि निर्विघ्नमस्तु ॥ ॐ उत्तरोत्तरमहरहरभिवृद्धिरस्तु ॥ ॐ उत्तरोत्तराः क्रियाः शुभाः शोभनाः सम्पद्यन्ताम् ॥ ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नसंपदस्तु ॥ ॐ तिथिकरणमुहूर्तनक्षत्रग्रहलग्नाधिदेवताः प्रीयन्ताम् ॥ ॐ तिथिकरणे समुहूर्ते सनक्षत्रे सग्रहे सलग्ने साधिदैवते प्रीयेताम् ॥ ॐ दुर्गापाञ्चाल्यौ प्रीयेताम् ॥ ॐ अग्निपुरोगाः विश्वेदेवाः प्रीयन्ताम् ॥ ॐ इन्द्रपुरोगाः मरुद्गणाः प्रीयन्ताम् ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ वशिष्ठपुरोगाः ऋषिगणाः प्रीयन्ताम् ॥ ॐ माहेश्वरीपुरोगाः उमामातरः प्रीयन्ताम् ॥ ॐ अरुन्धतीपुरोगा एकपत्न्यः प्रीयन्ताम् ॥ ॐ विष्णुपुरोगाः सर्वे देवाः प्रीयन्ताम् ॥ ॐ ब्रह्मपुरोगाः सर्वे वेदाः प्रीयन्ताम् ॥ ॐ ब्रह्म च ब्राह्मणाश्च प्रीयन्ताम् ॥ ॐ श्रीसरस्वत्यौ प्रीयेताम् ॥ ॐ श्रद्धामेधे प्रीयेताम् ॥ ॐ भगवती कात्यायनी प्रीयताम् ॥ ॐ भगवती माहेश्वरी प्रीयताम् ॥ ॐ भगवती ऋद्धिकरी प्रीयताम् ॥ ॐ भगवती वृद्धिकरी प्रीयताम् ॥ ॐ भगवती पुष्टिकरी प्रीयताम् ॥ ॐ भगवती तुष्टिकरी प्रीयताम् ॥ ॐ भगवन्तौ विघ्नविनायकौ प्रीयेताम् ॥ ॐ सर्वाः कुलदेवताः प्रीयन्ताम् ॥ ॐ सर्वाः ग्रामदेवताः प्रीयंताम् ॥ ॐ सर्वाः इष्टदेवताः प्रीयंताम् ॥ बहिरुदकसेकः ॥ ॐ हताश्च ब्रह्मद्विषः ॥ ॐ हताश्च परिपंथिनः ॥ ॐ हताश्च विघ्नकर्तारः ॥ ॐ शत्रवः पराभवं यान्तु ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ॐ शाम्यन्तु घोराणि ॥ ॐ शाम्यन्तु पापानि ॥ ॐ शाम्यन्त्वीतयः ॥ ॐ शाम्यन्तूपद्रवाः ॥ अन्तरुदकसेकः ॥ ॐ शुभानि वर्द्धन्ताम् ॥ ॐ शिवा आपः सन्तु ॥ ॐ शिवा ऋतवः सन्तु ॥ ॐ शिवा ओषधयः सन्तु ॥ ॐ शिवा वनस्पतयः सन्तु ॥ ॐ शिवा अतिथयः सन्तु ॥ ॐ शिवा अग्नयः सन्तु ॥ ॐ शिवा आहुतयः सन्तु ॥ ॐ अहोरात्रे शिवे स्याताम् ॥ ॐ निकामेनिकामेनः पर्जन्यो व्वर्षतु फलवत्यो नऽ ओषधयः पच्यन्तां योग-

१ ऋक् ॥ ॐ शंनः कनिक्रदद्देवः पर्जन्योऽअभिवर्षत्वोषधयः प्रतिधीयताम् ॥ शन्नोद्यावांपृथिवी शंप्रजाभ्यः शन्नोऽअस्तुद्विपदेशंचतुष्पदे ॥ यजुः निकामे० ॥ साम ॥ त्वष्टा ३४। नो दै वियम् । वँ चाँः । पर्जन्यो ब्र ह्म णं स्या २३ तीः । पुत्रै भ्रा तृभिरदिति नूँ यो त् २३ नाः । दुष्टरा २३ न्त्रां । मणं वा २३ चो ३४३। उँ २३४५ इ । डा ॥ अथर्व ॥ त्वष्टा मे दैव्यं वचः पर्जन्यो ब्रह्मणस्पतिः ॥ पुत्रैर्भ्रातृभिरदितिर्नु पातुनो दुष्टरं त्रायमाणं सहः ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

क्षेमो नं÷ कल्पताम् ॥ शुक्राङ्गारकबुधबृहस्पतिशनैश्चरराहुकेतुसोमसहितादित्यपुरोगाः सर्वे ग्रहाः प्रीयन्ताम् ॥ ॐ भगवान्नारायणः प्रीयताम् ॥ ॐ भगवान्पर्जन्यः प्रीयताम् ॥ ॐ भगवान्स्वामी महासेनः प्रीयताम् ॥ पुरोनुवाक्यया यत्पुण्यं तदस्तु ॥ याज्यया यत्पुण्यं तदस्तु ॥ वषट्कारेण यत्पुण्यं तदस्तु ॥ प्रातः सूर्योदये यत्पुण्यं तदस्तु ॥ एतत्कल्याणयुक्तं पुण्यं पुण्याहं वाचयिष्ये इति यजमानः ॥ वाच्यतामिति ब्राह्मणाः ॥ ॐ ब्राह्मं पुण्यमहर्यच्च सृष्ट्युत्पादनकारकम् ॥ वेदवृक्षोद्भवं नित्यं तत्पुण्याहं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मया क्रियमाणस्य अमुककर्मणः पुण्याहं भवन्तो ब्रुवन्तु इति यजमानः ॥ ॐ पुण्याहं इति ब्राह्मणाः ॥ एवं वचनं प्रतिवचनं च त्रिः पठित्वा ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



ॐ पुनन्तुं मा देवजनाः पुनन्तु मनंसा धियं÷ ॥ पुनन्तु विश्वांभूतानि जातंवेदः पुनीहि मां ॥ पृथिव्यामुद्धृतायान्तु यत्कल्याणं पुरा कृतम् ॥ ऋषिभिः सिद्धगन्धर्वैस्तत्कल्याणं ब्रुवन्तु नः ॥ भो ब्राह्मणाः मया क्रियमाणस्य अमुककर्मणः कल्याणं भवन्तो ब्रुवन्तु इति यज० ॥ ॐ कल्याणं ३॥ इति ब्राह्मणाः॥

---

१ ऋक् ॥ उद्गातेवंशकुनेसामंगायसि ब्रह्मपुत्रइंव सवंनेषु शंससि ॥ वृषेव व्वाजीशिशुंमतिरपीत्यांसर्वतोंनः शकुनेभद्रमावंदविश्वतोंनः शकुनेपुण्यमावंह ॥ यजुः ॥ पुनन्तुमादेवजनाः ॥ साम ॥ पुंना२नः सो१मा ३ धीं रा २३४ यों । आंपो२ वसा२ नो२ अर्पस्या२ रत्नधा२ यो२ निमृतस्य सा २ ई दं सांई । ॐ हां ३ उ वां । उं त्सो२ दे२ वो२ हि रा ३३ हां इ । उं हां ३ उ वां । ष्ये यो । ॐ ३ हो४ वां । हो४ ५ इ । डा ॥ अथर्व ॥ पुनन्तुंमा देवजनाः पुनन्तु मनंवो धिया पुनन्तु विश्वां भूतानि पवंमानः पुनातु मा ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ यथेमां व्वाचं कल्याणीमावदानि जनेभ्यः ॥ ब्रह्मराजन्याभ्याᳫं शूद्राय चार्याय च स्वाय चारणाय ॥ प्रियो देवानां दक्षिणायै दातुरिह भूयासमयम्मे कामः समृध्यतामुपमादोनमतु ॥ २ ॥ सागरस्य तु या ऋद्धिर्महालक्ष्म्यादिभिः कृता ॥ सम्पूर्णा सुप्रभावा च तामृद्धिं प्रब्रुवंतु नः ॥ भो ब्राह्मणाः अमुककर्मणः ऋद्धिं भवन्तो ब्रुवन्तु इति यजमानः ॥ कर्म ऋध्यताम् इति ब्राह्म० ॥

---

१ ऋक् ॥ अपाः सोममस्तमिन्द्र प्रयाहि कल्याणीर्जायासुरणं गृहेते ॥ यत्रारथस्य बृहतो निधानं विमोचनं वाजिनो दक्षिणावत् ॥ २ ॥ यजुः ॥ ॐ यथेमां वाचं कल्याणी० ॥ २ ॥

साम ॥ कौऽया५र । नश्चौ ३ यित्रा ३ और भुवाव । ऊं । तीर । सं दोर दृधः सं । स्वा । ॐ ३ होर हां यि । कं या २ ३ श चा यि । ष्ट यौर हो ३ । हुंम्मा २ । वां २ चों ३ ५ हां यि ॥ अथर्व ॥ ॐ विश्वजित्कल्याण्यै मापरिधेहि ॥ कल्याणि द्विपाच्च सर्वं नो रक्ष चतुष्पाद्यच्चनस्वम् ॥२॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

प. १९ ॐ सत्रस्य ऋद्धिरस्यगन्मज्योतिरमृताऽ अभूम ॥ दिवं पृथिव्याऽ अध्या- प. १९
रुहामाविदाम देवान्त्स्वर्ज्योतिः ॥ ३ ॥ स्वस्तिस्तु याविनाशाख्या
पुण्यकल्याणवृद्धिदा ॥ विनायकप्रिया नित्यं तां च स्वस्तिं ब्रुवन्तु नः ॥

१ ऋक् ॥ ॐ ऋध्यामस्तोमं सनुयाम वाजमानो मंत्रं सरथे होपयातं ॥ यशो न पक्वं मधु गोष्वन्तराभूतांशो अश्विनोः कामममाः ॥ ३ ॥ यजुः ॥ ॐ सत्रस्य० ॥ ३ ॥ साम ॥ ॐ ऊं हो वा ऊं हो वा ऊं हो ३ वा । अगन्मं ज्योतिः २ । अगन्मज्योतिः २ । अमृता अं भू म २ । अ मृ ता अं भू मां । तं रि क्षं पृथिव्या अध्या रु हा मा । २ । तं रि क्षं पृथिव्या अध्या रुहां म । दि व मं ते रि क्षां देध्या रु हां म ।३। अविदां म दे वां न ।३। समुद्रे वै र गं न्माहि ।३। ऊं हो वा ऊं हो ३ वा । सुवज्योंती २ ३ ४ ५ः ॥ ३ ॥

अथर्व ॥ ऋधंङ्क्त्रोयोति य आबभूवामृतां सुवर्द्धमानः सुजन्मा । अदंब्धासुर्भ्राजंमानो हेव त्रितो धर्तादाधारत्रीणि ॥ ३ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

भो ब्राह्मणाः मया॰ अमुककर्मणे स्वस्ति भवन्तो ब्रुवन्तु ॥ इति यजमानः ॥ आयुष्मते स्वस्ति इति ब्राह्मणाः ॥ ॐ स्वस्ति न ऽइन्द्रो वृद्धश्रवाः स्वस्ति नः पूषा विश्ववेदाः ॥ स्वस्ति नस्तार्क्ष्यो ऽअरिष्टनेमिः स्वस्ति नो बृहस्पतिर्दधातु ॥ समुद्रमथनाज्जाता जगदानन्दकारिका ॥ हरिप्रिया च

---

१ ऋक् ॥ ॐ स्वस्तये वायुमुपब्रवामहै सोमं स्वस्ति भुवनस्य यस्पतिः ॥ बृहस्पतिं सर्वगणं स्वस्तये स्वस्तय आदित्यासो भवन्तु नः ॥ ४ ॥ यजुः ॥ ॐ स्वस्तिनऽइन्द्रो॰ ॥ ४ ॥

साम ॥ स्त्रातारमिन्द्रमविता । रमीं २३ द्रोम । हवे हवे सुहवांशू । रमीं २३ द्रोम । हुवोयितु शक्रं पुरुहू । तमीं २३ द्रोम । इदं स्वस्तिं नो मे घे वा । वो ३४३ यि । तू ३ वोऽ ५ यिंद्रा ६५६ः ॥ ४ ॥

अथर्व ॥ ॐ स्वस्तिमात्र उतपित्रेणो अस्तु स्वस्ति गोभ्यो जगते पुरुषेभ्यः । विश्वं सुभूतं सुविदत्रं नो अस्तु ज्योगेव दृशेम सूर्यं ॥ ४ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. माङ्गल्या तां श्रियं च ब्रुवन्तु नः ॥ भो ब्राह्मणाः अमुककर्मण० प.
२० श्रीरस्त्विति भवन्तो ब्रुवन्तु इति यजमानः ॥ अस्तु श्रीः ३ इति ब्राह्मणाः ॥
ॐ श्रीश्चंते लक्ष्मीश्च पत्न्यांवहोरात्रे पार्श्वे नक्षंत्राणि रूपमश्विनौ व्यात्तंम् ॥
इष्णन्निंषाणामुम्मं॑ऽ इषाण सर्व्वलोकम्मं॑ऽ इषाण ॥ ५ ॥ मृकण्डसूनोरायुर्य-

---

१ ऋक् ॥ ॐ श्रियेजातः श्रियऽआनिरियाय श्रियं वयो जरितृभ्यो दधाति ॥ श्रियं वसांना अमृतत्वमांयन भवंन्ति सत्यासंमिथामितद्रौं ॥ ५ ॥ ॐ श्रीश्चते लक्ष्मीश्च० ॥ ५ ॥ इति यजुः ॥ साम ॥ गिर्वणः पा हिनैः सुतम ॥ गिर्वणः पौ । हिनेः सूता २ म ॥ मधो द्वा रा भि रा हो २ । ज्यो से २३ । हो उवा । इं न्द्रातवा २३ दां । तर्मा ये ३ व । यां २ शां २३४ औ हो वा । हरी ३ श्री २३४५: ॥ ५ ॥

अथर्व ॥ आस्तष्त्रयंती यजते उपाके उषासानक्तां सदतां नियोनौ ॥ दिव्ये योषणे बृहती सुरु- २०
क्मौ अधिश्रियें शुक्रपिशं दधाने ॥ ५ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ध्रुवलोमशयोस्तथा ॥ आयुषा तेन संयुक्ता जीवेम शरदः शतम् ॥ इति यजमानः ॥ शतं जीवन्तु भवन्तः इति ब्राह्म० ॥ ॐ शतमिन्नुशरदोऽ-

---

१ ऋक् ॥ शतंजीवशरदो वर्द्धमानः शतं हेमंताञ्छतमुवसन्तान् ॥ शतमिन्द्राग्नीसंवितावृहस्पतिः शतायुंषाहव्विषेमंपुनर्दुः ॥ ६ ॥ यजुः ॥ ॐ शतमिन्नुशरदोऽअन्तिदेवा० ॥ ६ ॥

साम ॥ हाँ उ ३। यशो हा उ ३। व र्चो हा उ ३। ओ स्मिँ न्होंयि।२। आस्मिँन्हा ३१ वं। वा २। तवे दिन्द्रा व मं वसु । त्वं पुष्यासि मध्यमं । से त्रों विश्वस्यं परमस्य रा जसि। नं कि ष्टा गो षु वृण्वते। हाँ उ ३। यशो हा ऊ ३। वर्चो हा उ।३। ओं स्मिँ न्होंयि।२। आस्मिँ न्हा ३१ उ। वा० २। ओयु विंश्वा युर्विंश्वं विश्वमा युरेशी महि प्रजा त्वष्टरंधि नि धे ह्यस्मे शं तं जी वे म शरं दो वयं ते २ ३ ४ ५ ॥ ६ ॥

अथर्व ॥ आयुरस्मै धेंहि जातवेदः प्रजां त्वष्टरधिनिधेह्यस्मै । रायस्पोषं सवितरासुवास्मै शतं जींवाति शरदंस्तवायम् ॥ ६ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. अन्तिदेवा यत्रांनश्चक्राजरसंन्तनूनांम् ॥ पुत्रासो यत्रं पितरो भवंन्ति मानोंम-
२१ ध्यारींरिषतायुर्गन्तोंः ॥ ६ ॥ शिवगौरीविवाहे या या श्री रामे नृपात्मजे ॥ प.
धनदस्य गृहे या श्रीरस्माकं सास्तु सद्मनि ॥ इति यजमानः ॥ अस्तु श्रीः
ॐ मंनंसः काममाकूंतिं व्वाचःसत्यमंशीय ॥ पशूनाᳫं रूपमन्नंस्य रसो यशः
श्रीः श्रंयतां मयि स्वाहां ॥ ७ ॥ प्रजापतिर्लोकपालो धाता ब्रह्मा च
देवराट् ॥ भगवाञ्छाश्वतो नित्यं नो वै रक्षतु सर्वतः ॥ ॐ भगवा-

---

१ ऋग् ॥ ॐ मनसः काममाकूंतिं वाचः संत्यमसीमहि ॥ पशूनां रूपंमन्नस्य मयि श्रीः
श्रयतां यशः ॥ ७ ॥ यजुः ॐ मनसः ॥ साम ॥ श्रॉयेन्त इव सू ४ रायोंम् । विश्वा२ । ई । दिन्द्रा २ ।
स्यंभा२–क्षोता । वासूनि २ जातो जानि मां ३र । नियोजों १ सा२ । मंति औंगं नदी २र ३ धिमः ।
मो २३ ती २ । भां र गां नों ३ दों । हुं १ । धिमों ३ः । ऽउ २ ३ ४ वा । श्रिये ६ ॥ ७ ॥ २१

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

न्प्रजापतिः प्रीयताम् ॥ ॐ प्रजांपते नत्वदेतान्यन्यो व्विश्वांरूपाणि परिताबभूंव ॥ यत्कांमास्ते जुहुमस्तन्नोंऽ अस्त्वयममुष्यं पिता सावस्य पिता व्वयꣳ स्यांम पतंयो रयीणाꣳस्वाहां ॥ ८ ॥

अथर्व ॥ एहयांतु वरुणः सोमों अग्निर्बृहस्पतिर्वसुंरेहयांतु ॥ अस्य श्रीयंमुपसंयांत सर्व उग्रस्यं चेतुः समंनसः सजाताः ॥ ७ ॥ ऋक् २॥ प्रजापंते नत्वदेतान्यन्यो विश्वांजातानि परिता-बंभूव ॥ यत्कांमास्ते जुहुमस्तन्नों अस्तु वयं स्यांमपतंयो रयीणाम् ॥ ८ ॥ यजुः ॥ ॐ प्रजापते नत्वदेता० ॥ ८ ॥

'साम ॥ हां ३ ३ । ईमोः । ३ । प्रजोः ।३। प्रजापंतेर । हा३ १ उ । वा २ । प्रजापंतेर । होइ ॥ ३ ॥ ऐं । हृदयं । ऐं३र । हृदयांइ १ उ । वा २ प्रजा१र २रूपमजी२र जने ३। ई ह इडा २ ३ ४ ५ ॥ ८ ॥ अथर्व ॥ प्रजापंतेरावृंतो ब्रह्मंणा वर्मणाहं कश्यंपस्य ज्योतिषा वर्चसा च जरदष्टिः कृतवींर्यो विहांयाः सहस्रांयुः सुकृतश्चरेयं ॥ ८ ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



आयुष्मते स्वस्तिमते यजमानाय दाशुषे ॥ श्रिये दत्ताशिषः सन्तु ऋत्विग्भिर्वेदपारगैः इति यजमानः ॥ आयुष्मते स्वस्ति इति ब्राह्मणाः ॥ ॐ प्रतिपन्थां-

१ ऋक् ॥ स्वस्तये वाजिभिश्च प्रणेतः संयन्महीरिषं आसात्सि पूर्वीः ॥ रायोवन्तारो बृहतः स्यामा स्मेऽअस्तु भर्गइन्द्र प्रजावान् ॥ ९ ॥ यजुः ॥ ॐ प्रतिपन्थामपद्महि ॥ ९ ॥

साम ॥ ईयइया ३ हाँयि । त्यमूषुवाजिनां ३ दे ३ वे जू तं मूं । ई ४ यें ईयाँ । हाँ २३४ यि । सहो वाँ नंतौं । रूत्ता ३ । राङ रैथौनौम् । ई य इया ३ हाँयि । अरिष्टा ३ । नाँयि । मिं ३ पृत । नाँ जै माँ शूमं । ई ४ याँ ई याँ । हा । २ ३ ४ ५ यि । स्वस्तं । याँयि । ताँ क्ष्यं मिहा ३ ४ ३ । हू ३ वाँ ऽ ५ यिया ६५६ ॥ ९ ॥

अथर्व-॥ वेदाः स्वास्ति इन्द्रोर्घणः स्वस्तिः परशुर्वेदिः परशुर्नः स्वास्ति ॥ हविष्कृतो याज्ञियां यज्ञकामास्ते देवासो यज्ञमिमं जुषंताम् ॥ ९ ॥ ( अथवा ) त्यमूषु वाजिनं देवजूतं सहोवानन्त ऋतारं स्थानाम् ॥ अरिष्टनेमिं पृतना जमाशुं स्वस्तये ताक्ष्यं मिहांहुवेम ॥ ९ ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मपह्महिस्वस्तिगामंनेहसंम् ॥ येनविश्वाः परिद्विषोंवृणक्तिंविन्दतेवसुं ॥ ९ ॥
ॐ स्वस्तिवाचनसमृद्धिरस्तु इति यज० ॥ अस्तु समृद्धिः इति ब्राह्म० ॥
कृतस्य स्वतिवाचनकर्मणः समृद्धयर्थं स्वस्तिवाचकेभ्यो ब्राह्मणेभ्यः इमां दक्षिणां
विभज्य दातुमहमुत्सृजे ॥ अथाभिषेकः ॥ अभिषेके पत्नी वामतः ततः पात्र-
पातितजलेन पल्लवदूर्वाभिः उदङ्मुखाः तिष्ठन्तो ब्राह्मणाः सकुटुम्बं यजमान-
मभिषिञ्चेयुः ॥ तत्र मंत्राः ॥ ॐ पयंः पृथिव्यांपयऽओषंधीषुपयोंदिव्यन्तरिंक्षे
पयोंधाः ॥ पयंस्वतीः प्प्रदिशंः सन्तु मह्यंम् ॥ १ ॥ ॐ पञ्चंनद्यः सरंस्वतीमापिं
यन्तिसस्रोंतसः ॥ सरंस्वतीतुपंञ्चधासोदेशे भंवत्सरित् ॥ २ ॥ ॐ व्वरुंणस्योत्त-
म्भंनमसि व्वरुंणस्य स्कम्भसर्ज्जनीस्थो व्वरुंणस्य ऋतसदंन्न्यसि व्वरुंणस्यऽऋत-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



सदनमासि वरुणस्यऽऋतसदनमासीद ॥ ३ ॥ ॐ पुनन्तुंमादेवजनाः पुनन्तु मनं-
सा धियं÷ ॥ पुनन्तु विश्वां भूतानि जातवेदः पुनीहि मां ॥४॥ ॐ देवस्यंत्वा सवितुः
प्रंसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्तांभ्याम् ॥ सरंस्वस्त्यै व्वाचोयन्तुर्यन्त्रियें दधामि
बृहस्पतेष्ट्वासाम्म्राज्येनाभिषिंञ्चाम्यसौ ॥ ५ ॥ ॐ देवस्यंवा० ॥ सरंस्वत्यै व्वाचो
यन्तुर्यन्त्रेणाग्नेः साम्म्राज्येनाभिषिंञ्चामि ॥ ६ ॥ ॐ देवस्यंत्वा० ॥ अश्विनो
र्भैषंज्येन तेजंसे ब्रह्मवर्चसायाभिषिंञ्चामि सरंस्वत्यै भैषंज्येन व्वीर्यायान्नाद्यांयाभिषिं-
ञ्चामीन्द्रंस्येन्द्रियेण बलांय श्रियै यशंसेऽभिषिंञ्चामि ॥ ७ ॥ ॐ व्विश्वांनिदेव
सवितर्दुरितानि परांसुव ॥ यद्भद्रन्तन्नऽआसुंव ॥ ८ ॥ धामच्छदग्निरिन्द्रो ब्रह्मा
देवो बृहस्पतिं÷ ॥ सचेतसोव्विश्वेदेवायज्ञंप्रावन्तुनः शुभे ॥ ९ ॥ ॐ त्वयांविष्ठ-



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

दाशुषो नॄँः पांहि शृणुधीगिरंः ॥ रक्षांतोकमुतत्मनां ॥ १० ॥ ॐ अन्नंपते-
न्नंस्य नो देह्यनमीवस्यं शुष्मिणंः ॥ प्रप्रंदातारंन्तारिषऽऊर्ज्जंन्नो धेहि द्विपदे चतुं-
ष्पदे ॥ ११ ॥ ॐ द्यौः शान्तिरन्तरिंक्षꣳ शान्तिंः पृथिवी शान्तिरापः
शान्तिरोषंधयः शान्तिंः ॥ व्वनस्पतंयः शान्तिर्व्विश्वेंदेवाः शान्तिर्ब्रह्म
शान्तिः सर्वꣳ शान्तिः शान्तिंरेव शान्तिः सामा शान्तिंरेधि ॥ १२ ॥
यतोंयतः समीहंसे ततोंनोऽअभंयङ्कुरु ॥ शन्नंः कुरु प्रजाभ्योऽभंयं नः पशुभ्यंः
॥ १३ ॥ सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः ॥ वासुदेवो जगन्नाथस्तथा
संकर्षणो विभुः ॥ १ ॥ प्रद्युम्नश्चानिरुद्धश्च भवन्तु विभवाय ते ॥ आखण्ड-
लोग्निर्भगवान् यमो वै निर्ऋतिस्तथा ॥ २ ॥ वरुणः पवनश्चैव धनाध्यक्षस्तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



शिवः ॥ ब्रह्मणा सहिताः सर्वे दिक्पालाः पान्तु ते सदा ॥ ३ ॥ कीर्तिर्लक्ष्मीधृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः ॥ बुद्धिर्लज्जा वपुः शान्तिः कान्तिस्तुष्टिश्च मातरः ॥ ४ ॥ एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः ॥ आदित्यश्चन्द्रमा भौमो बुधजीवसितार्कजाः ॥ ५ ॥ ग्रहास्त्वामभिषिञ्चन्तु राहुः केतुश्च तर्पिताः ॥ देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ॥ ६ ॥ ऋषयो मनवो गावो देवमातर एव च ॥ देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसाङ्गणाः ॥ ७ ॥ अस्त्राणि सर्वशस्त्राणि राजानो वाहनानि च ॥ औषधानि च रत्नानि कालस्यावयवाश्च ये ॥ ८ ॥ सरितः सागराः शैलास्तीर्थानि जलदा नदाः ॥ एते त्वामभिषिञ्चन्तु धर्मकामार्थसिद्धये ॥ ९ ॥ अमृताभिषेकोऽस्तु ॥ शान्तिः पुष्टिस्तुष्टिश्चास्तु ॥ ततः पुत्रवतीभिर्वृद्धसुवासिनी आर्तीक्यं कुरुतः ॥ तत्र मंत्रः ॥ ॐ अनांधृष्टापुरस्तांद्ग्नेराधिंपत्यऽ-



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

आयुर्म्मेदाः पुत्रवंतीर्दक्षिणतऽ इन्द्रस्याधिपत्येप्रजाम्मेदाः ॥ सुखदांपश्चाद्देवस्यं सवितुराधिपत्ये चक्षुर्म्मेदाऽआश्रुंतिरुत्तरतो धातुराधिपत्ये रायस्पोषम्मेदाः ॥ विधृंतिरुपरिष्ठाऽद्बृहस्पतेराधिपत्यऽओजोमेदाविश्वांभ्योमानाष्ट्राभ्यंस्पाहिमनोरश्वांसि ॥ इति ॥

## अथ मातृकापूजनम् ।

तत्रायं क्रमः ॥ अविघ्नो मंडपश्चैव मातृणां पूजनं सकृत ॥ वैश्वदेवं वसोर्द्धारा नान्दीश्राद्धमतः परम् ॥ अविघ्नपूजनात्पूर्वं वैश्वदेवं विधाय च ॥ ततो गोधूमादिधान्यपूरितें हरिद्रादिरञ्जिते मृन्मयकलशे मोदादिषड्विनायकमातृणां प्रतिमाः कुंकुमेन लिखित्वावाहयेत् ॥ तद्यथा ॥ ॐ मोदाय नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



मोदं० ॥ १ ॥ प्रमोदाय० प्रमोदमा० ॥ २ ॥ ॐ सुमुखाय० सुमुखं० ॥ ३ ॥ ॐ दुर्मुखाय० दुर्मुखं० ॥ ४ ॥ ॐ अविघ्नाय० अविघ्नं० ॥ ५ ॥ ॐ विघ्नहर्त्रे० विघ्नहर्तारं० ॥ ६ ॥ ॐ मनोजूतिरिति प्रतिष्ठाप्य षोडशोपचारैः संपूजयेत् ॥ ॐ भूर्भुवःस्वः मोदादिषड्विनायकाः सुप्रतिष्ठिता वरदा भवन्तु ॥ ॐ मोदादिषड्विनायकेभ्यो नम इति नाममंत्रेणावाहनादिपुष्पाञ्जल्यन्तं पूजनं कार्यम् ॥ अनया पूजया मोदादिषड्विनायकाः प्रीयन्ताम् ॥ ततः स्तम्भरोपणादिकमावरणद्वारफलकान्तसम्पादितमण्डपे मण्डपमातृकाः स्थापयेदित्येके ( केचित्तु आचार्यहस्तेषु प्रोक्षितादिकं कार्यम् ) ॥ अत्राः पान्तु । सुप्रोक्षितमस्तु । गंधाः पान्तु । सुमङ्गल्यं चास्तु । अक्षताः पान्तु । आयुष्यमस्तु । पुष्पाणि पान्तु । सौश्रियमस्तु । सफलताम्बूलानि पान्तु । ऐश्वर्यारोग्यमस्तु ॥ दक्षिणाः पान्तु ॥ बहुधनमस्तु ॥ अपूपाः पान्तु । बह्वन्नं चास्तु ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

शाखाद्दूर्वाः पान्तु ॥ शाखापल्लवानां वृद्धिश्चास्तु ॥ तत आचार्येण दूर्वाशम्याम्रादिप्रशस्तवृक्षपत्राणां रक्तसूत्रेण पञ्चधा वेष्टनं कार्यम् ॥ आसां मण्डपमातृसंज्ञा ताश्च मंडपमातृर्मण्डपे वा वंशपात्रे स्थापयित्वा ॥ ॐ वसोः पवित्रमिति मंत्रेण यजमानपत्न्या शाखासु तैलारोपणं कार्यम् ॥ ॐ व्वसोः पवित्रमसि शतधारं व्वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वा सविता पुनातु व्वसोः पवित्रेण शतधारेण सुप्वा कामधुक्षः ॥ ॐ अहिरिव भोगैरिति शाखासु हरिद्राकुंकुमादिसुगंधि द्रव्येणोद्वर्त्तनम् ॥ ॐ निकामे निकामेति उष्णोदकेन स्नपनम् ॥ ॐ दधिक्राव्ण इति शाखासु दध्यक्षतवन्दनम् ॥ ॐ या ओषधीरिति यजमानहस्ते शाखाग्रहणम् ॥ ततो यजमानपत्न्या हस्ते शस्त्रगर्भपञ्चमीं शाखां दत्वा काण्डात्काण्डादिति कण्डनं कार्यम् ॥ (इति यत्र तत्र

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



कुलाचारः )॥ तत आग्नेयादिचतुर्षु मंडपकोणेषु चतुरः स्तम्भान्मध्ये एकं रोपयेत॥ ॐ देवस्यत्वेति अभ्रिमादत्ते ॥ ॐ इदमहठं० रंक्षसां ग्रीवाऽअपिं कृन्तामि ॥ इत्यवटोपरि लिखति ॥ ॐ मावोंरिषत्खनितायंस्मै चाहंखनांमिवः ॥ द्विपाच्च-तुष्पादस्माकठं० सर्वमस्त्वनातुरम् ॥ इति खनति ॥ ॐ सिञ्चाति परिंषिंचं-त्युत्सिंचांति पुनन्तिं च ॥ सुरांयै बभ्रवै मदें किन्त्वो व्वंदाति किन्त्वः ॥ इत्यवटे अप आसिंचति ॥ ॐ यवोंसियवया स्मद्वेषों यवयारांतीः ॥ इत्यवटे यवान्क्षिपेत॥ दर्भसिद्धार्थकान् तूष्णीं क्षिपेत् ॥ ॐ काण्डात्कण्डादिति अवटे दूर्वाङ्कुरान्क्षिपेत्॥ ॐ दधिक्राव्णऽ इति दधि क्षिपेत् ॥ ॐ याः फलिनीति अवटे पूगीफलं क्षिपेत् ॥ ॐ हिरण्यगर्भेति सुवर्णं वा ताम्रखंडं क्षिपेत् ॥ ॐ उच्छ्रयस्वव्वनस्पतऽऊर्ध्वो-



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

मां पाह्यर्ठ० हंसऽऽआस्यवज्ञस्योद्दचं÷ । इति स्तम्भोत्थापनम् ॥ ॐ ऊर्ध्वऽऊषुणं-ऊतर्योतिष्ठांदेवोनसंविता ॥ ऊर्द्ध्वोव्वाजंस्यसनिंतायदंजीभिंर्व्वांघद्भिंर्व्विह्वयां-महे ॥ इत्यवटे स्तम्भारोपणम् ॥ ॐ स्थिरोभंव व्वीड्वङ्गऽआशुर्भंवव्वाज्यर्वंन् ॥ पृथुर्भंवसुखदस्त्वमग्नेः पुरीषवाहंणः ॥ इत्यवटस्य समन्तान्मृत्पूर्णेन स्थिरी-करणम् ॥ ( अथवा वंशपात्रमध्ये चतुर्षु कोणेषु शाखापल्लवान् मध्ये एकं स्थापयेत् यथा कुलाचारः ) ततः स्तम्भारोपणक्रमेण पंचसु स्तम्भेषु शाखा-पल्लवं यदाबध्नमिति बध्नीयात् ॥ ॐ यदांबध्नंदाक्षायणाहिरंण्यर्ठ० शतानींकाय सुमनस्यमांनाः ॥ तन्मऽआबंध्नामि शतशांरदायायुंष्माञ्जरदंष्टिर्यथासंम् ॥ इति स्तम्भेषु बध्नीयात ॥ तत आग्नेयादिस्तम्भेषु क्रमेण मण्डपमातरः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



पूजयेत् ॥ तद्यथा ॥ ॐ नन्दिन्यै नमः ॥ नन्दिनीमा० ॥ १ ॥ ॐ नलिन्यै नमः ॥ नलिनीमा० ॥ २ ॥ ॐ मैत्रायै नमः ॥ मैत्रामा० ॥ ३ ॥ ॐ उमायै नमः ॥ उमामा० ॥ ४ ॥ ॐ पशुवर्द्धिन्यै नमः । पशुवर्द्धिनीमा० ॥ ५ ॥ ॐ मनाजूतिरिति प्रतिष्ठाप्य सर्वासां एकतन्त्रेण षोडशोपचारैः पञ्चोपचारैर्वा पूजयेत् ॥ ॐ भूर्भुवःस्वः नन्दिन्यादिमंडपमातृभ्यो नमः इति मंत्रेण ॥ अनया पूजया नन्दिन्यादिमंडपमातरः प्रीयन्ताम् ॥ ततो मंडपे आग्नेय्यां पीठोपरि वस्त्रं प्रसार्य तदुपरि षोडशकोष्ठानि कुंकुमादिना कृत्वा कोष्ठेषु अक्षत-पुंजेषु पूगीफलेषु वा षोडशमातृः स्थापयेत्पूजयेत ॥ ( अथाचारः गौर्यादि-मातरो वंशपात्रे पीतं पटं प्रसार्य तदुपरि षोडश मातृः पूजयेत् ) तत्र क्रमः ॥ ॐ गणेशाय नमः ॥ गणेशमा० ॥ १ ॥ ॐ गौर्य्यै नमः ॥ गौरीमा० ॥ २ ॥ ॐ पद्मायै नमः ॥ पद्मामा० ॥ ३ ॥ ॐ शच्यै नमः ॥ शचीमा० ॥ ४ ॥



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

ॐ मेधायै नमः । मेधामा० ॥ ५ ॥ ॐ सावित्र्यै नमः ॥ सावित्रीमा० ॥ ६ ॥ ॐ विजयायै नमः ॥ विजयामा० ॥ ७ ॥ ॐ जयायै नमः ॥ जयामा० ॥ ८ ॥ ॐ देवसेनायै नमः ॥ देवसेनामा० ॥ ९ ॥ ॐ स्वधायै नमः ॥ स्वधामा० ॥ १० ॥ ॐ स्वाहायै नमः ॥ स्वाहामा० ॥ ११ ॥ ॐ मातृभ्यो नमः ॥ मातृः आवा० ॥ १२ ॥ ॐ लोकमातृभ्यो नमः ॥ लोकमातृः आ० ॥ १३ ॥ ॐ हृष्ट्यै नमः ॥ हृष्टिमा० ॥ १४ ॥ ॐ पुष्ट्यै नमः ॥ पुष्टिमा० ॥ १५ ॥ ॐ तुष्ट्यै नमः ॥ तुष्टिमा० ॥ १६ ॥ ॐ आत्मनः कुलदेवतायै नमः ॥ आत्मनः कुलदेवतामा० ॥१७॥ (ततो चतुर्दशमातृंपक्षे मातृणां लोकमातृणाञ्चावाहनं विशेषः) ॐ मनोजूतिरिति गणपत्यादिकुलदेवतान्तमातरः सुप्रतिष्ठिता वरदा भवन्तु ॥ ॐ गणपत्यादिकुलदेवतान्तमातृभ्यो नमः इति पूजयेत् ॥

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



# अथ जलमातृपूजनम् ।

तत्रायं क्रमः ॥ कांस्यपात्रे वा ताम्रपात्रे प्रभूतजलपूरणम् ॥ तत्र मत्स्यै नमः मत्सीमा० ॥ १ ॥ ॐ कूर्म्यै नमः कूर्मीमा० ॥ २ ॥ ॐ वाराह्यै नमः वाराहीमा० ॥ ३ ॥ ॐ माण्डूक्यै नमः ॥ माण्डूकीमा० ॥ ४ ॥ ॐ मकर्य्यै नमः ॥ मकरीमावाहयामि ॥ ५ ॥ ॐ ग्राहक्यै नमः ॥ ग्राहकीमा० ॥ ६ ॥ ॐ क्रौंचक्यै नमः ॥ क्रौंचकीमा० ॥ ७ ॥ इत्यावाह्य प्रतिष्ठाप्य पंचोपचारैः पूजयेत् ॥

# अथ स्थलमातृपूजनम् ।

ॐ ब्राह्मयै नमः ब्राह्मीमा० ॥ १ ॥ ॐ माहेश्वर्य्यै नमः माहेश्वरीमा० ॥ ॥ २ ॥ ॐ कौमार्य्यै नमः ॥ कौमारीमा० ॥ ३ ॥ ॐ वैष्णव्यै नमः



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वैष्णवीमा० ॥ ४ ॥ ॐ वाराह्यै नमः वाराहीमा० ॥ ५ ॥ ॐ इन्द्राण्यै नमः इन्द्राणीमा० ॥ ६ ॥ ॐ चामुण्डायै नमः चामुण्डामा० ॥ ७ ॥ इत्यावाह्य प्रतिष्ठाप्य पूजयेत् ॥

## अथ गृहद्वारदक्षिणे वामेच गोमयापिंडेषु क्रमेण द्वारमातृः पूजयेत्।

ततो द्वारदक्षिणे गोमयपिंडेषु ॥ ॐ जयन्त्यै नमः जयन्तीमा० ॥ १ ॥ ॐ मङ्गलायै नमः मंगलामा० ॥ २ ॥ ॐ पिङ्गलायै नमः पिंगलामा० ॥ ३ ॥ ततो द्वारवामे गोमयापिंडयोः ॥ ॐ आनन्दवर्द्धिन्यै नमः आनन्दवर्द्धिनीमा० ॥ ॥ १ ॥ ॐ महाकाल्यै नमः ॥ महाकालीमा० ॥ २ ॥ इत्यावाह्य प्रतिष्ठाप्य पूजयेत् ॥ ततो गौर्यादिमातृवत् गृहाभ्यन्तरभित्ते गोमयपिंडेषु चतुर्दश गृहमातरः पूजयेत ॥ तद्यथा ॥ ॐ कीर्त्यै नमः कीर्तिमा० ॥ १ ॥ ॐ लक्ष्म्यै नमः

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



लक्ष्मीमा० ॥ २ ॥ ॐ धृत्यै नमः धृतिमा० ॥ ३ ॥ ॐ मेधायै नमः मेधामा० ॥ ४ ॥ ॐ ॐ पुष्ट्यै नमः पुष्टिमावाहयामि ॥ ५ ॥ ॐ श्रद्धायै नमः श्रद्धामा० ॥ ६ ॥ ॐ क्रियायै नमः क्रियामा० ॥ ७ ॥ ॐ मत्यै नमः मतिमा० ॥ ८ ॥ ॐ बुद्ध्यै नमः बुद्धिमा० ॥ ९ ॥ ॐ लज्जायै नमः लज्जामा० ॥ १० ॥ ॐ वपुषे नमः वपुषमा० ॥ ११ ॥ ॐ शान्त्यै नमः शान्तिमा० ॥ १२ ॥ ॐ तुष्ट्यै नमः तुष्टिमा० ॥ १३ ॥ ॐ कान्त्यै नमः कान्तिमावाहयामि ॥ १४ ॥ इत्यावाह्य प्रतिष्ठाप्य षोडशोपचारैः पूजयेत् ॥

## अथ घृतमातृकापूजनम् ।

ततो भित्ते शूर्पे वा घृताक्तसिन्दूरेण दक्षिणोत्तरा: अष्टविंशतिबिन्दुकरणेनालङ्करणम् ॥ तत्राधः सप्तसु बिंदुषु घृतेन वसोः पवित्रमिति प्रतिबिन्दुधारां



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

कुर्यात् ॥ ॐ व्वसोः पवित्रमसिशतधारंव्वसोः पवित्रमसि सहस्रधारम् ॥ देवस्त्वासविता पुनातुव्वसोः पवित्रेणशतधारेण सुप्वा इति सप्तधारां कृत्वा ॐ कामंधुक्षः इति गुडेन धारामेकीकरणम् ॥ प्रतिधारामेकैकदेवतामावाहयेत् ॥ ॐ श्रियै नमः श्रियमा० ॥ १ ॥ ॐ लक्ष्म्यै नमः लक्ष्मीमा० ॥ २ ॥ ॐ धृत्यै नमः धृतिमा० ॥ ३ ॥ ॐ मेधायै नमः मेधामा० ॥ ४ ॥ ॐ पुष्ट्यै नमः पुष्टिमा० ॥ ५ ॥ ॐ श्रद्धायै नमः श्रद्धामा० ॥ ६ ॥ ॐ सरस्वत्यै नमः सरस्वतीमा० ॥ ७ ॥ इत्यावाह्य प्रतिष्ठाप्य पूजयेत् ॥ प्रार्थना ॥ यदङ्गत्वेन भो देव्यः पूजिता विधिमार्गतः ॥ कुर्वन्तु कार्यमखिलं निर्विघ्नेन क्रतूद्भवम् ॥ अनया पूजया वसोर्द्धारादेवताः प्रीयन्ताम् ॥ अथायुष्यमन्त्रजपः ॥ ॐ आयुष्यंव्वर्चस्यꣳरायस्पोषमौद्भिदम् ॥ इदꣳहिरण्यंवर्च्चस्वज्जैत्रायाविशताद्-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं. ३० दु॒॥म् ॥१॥ ॐ न तद्रक्षा॑ᳬसि॒ न पि॑शा॒चास्त॑रन्ति दे॒वाना॒मोज॑: प्रथम॒जᳬ ह्ये॒तत् ॥ यो बिभ॑र्ति दाक्षाय॒णᳬ हिर॑ण्यᳬ स दे॒वेषु॑ कृणुते दी॒र्घमायु॑: स मनु॒ष्ये॑षु कृणुते दी॒र्घमायु॑: ॥ २ ॥ ॐ यदाब॑ध्नन्दाक्षाय॒णा हिर॑ण्यᳬ श॒तानी॑काय सुमन॒स्यमा॑नाः ॥ तन्म॒ऽआब॑ध्नामि श॒तशा॑रदा॒यायु॑ष्मा॒ञ्जर॑दष्टि॒र्यथास॑म् ॥ ३ ॥

## अथ साङ्कल्पिकनान्दीश्राद्धम् ।

ततः पत्रावल्योपरि चतुर्षु स्थानेषु पूर्वादिक्रमेण वसुकुशान्नृजून्धृत्वा कुशोपरि प्रादक्षिण्यने विश्वेदेवादीन्पूजयेत् ॥ तद्यथा ॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ १ ॥ ॐ गोत्राः मातृपितामहीप्रपितामह्यो नान्दीमुख्यः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं पं. ३०

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

वृद्धिः ॥ २ ॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ ३ ॥ ॐ गोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः इदं वः पाद्यं पादावनेजनं पादप्रक्षालनं वृद्धिः ॥ ४ ॥ अथासनदानम् ॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इमे आसने वो नमः नांदीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तस्तथा प्राप्नुवामः ॥ १ ॥ ॐ गोत्राः मातृपितामहीप्रपितामह्यः नान्दीमुख्यः इमे आसने वो नमः नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्त्यो भवन्त्यस्तथा प्राप्नुवामः ॥२॥ गोत्राः पितृपितामहप्रपितामहाः नान्दीमुखाः इमे आसने वो नमः ॥ नान्दीश्राद्धेक्षणौ क्रियेतां यथा प्राप्नुवन्तो भवन्तस्तथाप्राप्नुवामः ॥ ३ ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः
५॥ इमे आसने वो नमः नान्दीश्राद्धे क्षणौ क्रियेतां यथा प्राप्नुवंतो भवन्तस्तथा

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



प्राप्नुवामः ॥ ४ ॥ ततो गन्धादिदानम् ॥ गंधपुष्पधूपदीपताम्बूलयज्ञोपवीत-वस्त्राणि दद्यात्तत्र संकल्पः ॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः इदं वो गन्धाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ १ ॥ ॐ गोत्राः मातृपितामही-प्रपितामह्यः नांदीमुख्यः इदं वो गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ २ ॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः इदं वो गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ ३ ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नान्दीमुखाः इदं वो गंधाद्यर्चनं स्वाहा संपद्यतां वृद्धिः ॥ ४ ॥ ततो युग्मब्राह्मणभोजननिमित्तं आमान्ननिष्क्रयदानम् ॥ ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नान्दीमुखाः एतद्वो युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयीभूतं द्रव्यम-मृतरूपेण स्वाहा सम्पद्यताम्वृद्धिः ॥ १ ॥ गोत्राः मातृपितामहीप्रपितामह्यो नान्दीमुख्यः एतद्वो युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

स्वाहा संपद्यतां वृद्धिः ॥ २ ॥ गोत्राः पितृपितामहप्रपितामहाः नन्दीमुखाः एतद्वो युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा संपद्यतां वृद्धिः ॥ ३ ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः एतद्वो युग्मब्राह्मणभोजनपर्याप्तामान्ननिष्क्रयभूतं द्रव्यममृतरूपेण स्वाहा सम्पद्यतां वृद्धिः ॥ ४ ॥

## अथ सक्षीरयवमुदकदानं अक्षय्योदकस्थाने ।

ॐ सत्यवसुसंज्ञकाः विश्वेदेवाः नांदीमुखाः प्रीयन्ताम् ॥ १ ॥ ॐ गोत्राः मातृपितामहीप्रपितामह्यो नांदीमुख्यः प्रीयन्ताम् ॥ २ ॥ ॐ गोत्राः पितृपितामहप्रपितामहाः नांदीमुखाः प्रीयन्ताम् ॥ ३ ॥ द्वितीयगोत्राः मातामहप्रमातामहवृद्धप्रमातामहाः सपत्नीकाः नांदीमुखाः प्रीयंताम् ॥ ४ ॥ ॐ गोत्रन्नो

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.



वर्धतां दातारो नोभिवर्द्धन्तां वेदाः सन्ततिरेव च ॥ श्रद्धा च नो माव्यगमद्बहु देयं च नोस्तु । अन्नं च नो बहु भवेदतिथींश्च लभेमहि ॥ याचितारश्च नः सन्तु मा च याचिष्म कञ्चन ॥ एताः सत्याः आशिषः सन्तु इति यजमानः ॥ सन्त्वेताः सत्याः आशिषः इति ब्राह्मणाः ॥

## अथ दक्षिणादानम् ।

ॐ सत्यवसुसंज्ञकविश्वेषां देवानां नान्दीमुखानां कृतैतत् नांदीश्राद्धफलप्रतिष्ठासिद्ध्यर्थं द्राक्षामलकयवमूलनिष्कयीभूतं द्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥ १ ॥ ॐ गोत्राणां मातृपितामहीप्रपितामहीनां नांदीमुखीनां कृतैतन्नांदीश्राद्धप्रतिष्ठार्थं द्राक्षामलकयवमूलनिष्कयीभूतं द्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥ २ ॥ ॐ गोत्राणां पितृपितामहप्रपितामहानां



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

नान्दीमुखानां कृतैतन्नान्दीश्राद्धप्रतिष्ठार्थं द्राक्षामलकयवमूलनिष्क्रयी- भूतं द्रव्यं यथानामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥३॥ द्वितीयगोत्रा- णां मातामहप्रमातामहवृद्धप्रमातामहानां नान्दीमुखानां सपत्नीकानां कृतैतन्नांदीश्राद्ध प्रतिष्ठार्थं द्राक्षामलकयवमूलनिष्क्रयीभूतं द्रव्यं यथा- नामगोत्राय ब्राह्मणाय दातुमहमुत्सृजे ॥४॥ ॐ उपास्मै गायतान्नरः पवमानायेन्दवे ॥ अभिदेवाँ ऽइयक्षते ॥१॥ इडामग्नेपुरुदंसंसनिङ्गोः शश्वतमं हवमानायसाध ॥ स्यान्नः सूनुस्तनयोविजावाग्ने सातें सुमतिर्भूत्वस्मे ॥२॥ ततो यजमानः अनेन नांदीश्राद्धं सम्पन्नम् ॥ ब्राह्मणाः सुसम्पन्नम् ॥ ॐ वाजेवाजे वतवाजिनो नोधनेषु विप्राऽअमृताऽऋतज्ञाः ॥ अस्यमध्वः पिबतमादयध्वंतृप्तायात-

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

पं० पथिभिर्देवयानैः ॥ इति पितृविसर्जनम् ॥ ॐ विश्वेदेवाः प्रीयन्ताम् ।
इति देवविसर्जनम् ॥ मयाचरितसांकल्पिकनांदीश्राद्धन्यूनातिरिक्तो यो पं०
विधिः स उपविष्टब्राह्मणानां वचनाच्छ्रीगणेशप्रसादात्परिपूर्णोऽस्तु ।
३३ ब्राह्मणाः अस्तु पूर्णः ॥ इति नान्दीश्राद्धम् ॥

इति पञ्चाङ्ग-पूजन-पद्धतिः समाप्ता ।

प्रकाशकः
मास्टर खेलाड़ीलाल संकटा प्रसाद
संस्कृत पुस्तकालय
कचौड़ीगली, वाराणसी-१



CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

| | |
|---|---|
| श्रीसत्यनारायण व्रत कथा | ३-०० |
| विवाह पद्धतिः भा. टी. | ६-०० |
| उपनयन पद्धतिः ,, | ६ ०० |
| विष्णुयाग पद्धतिः मूल | २०-०० |
| रुद्रयाग पद्धतिः ,, | २५-०० |
| शिलान्यास-देहलीन्यास पद्धतिः | ४-०० |
| वास्तुशान्ति प्रयोगः भा.टी. | ६-०० |
| वाशिष्ठीहवन पद्धति भा.टी. | ६-०० |
| कुण्डमण्डपसिद्धिः भा.टी. | ४-०० |
| पञ्चाङ्ग-पूजन-पद्धतिः मूल | ५-०० |
| पञ्चदान पद्धतिः ,, | ५-०० |
| नारायणबलिप्रयोगः भा.टी. | ८-०० |
| श्रावणीप्रयोगः | १०-०० |
| प्रतिष्ठा महोदधि | ५०-०० |
| दुर्गासप्तशती-पत्रात्मकम् मूल | ९-०० |
| दुर्गासप्तशती सजिल्द ,, | १०-०० |
| एकोद्दिष्टश्राद्ध भा.टी. | ३) |
| ग्रहप्रयोगःअर्थात् ग्रहशान्तिः | २५) |
| प्रेतमञ्जरी भा.टी. | १५) |
| श्राद्धसंग्रह अर्थात् श्राद्धविवेक | ५०) |
| अर्कविवाह भा.टी. | २) |
| कुम्भविवाह भा.टी. | २) |
| चतुःषष्ठिवास्तुमण्डलचक्रम् | १) |
| चतुःषष्ठियोगिनीचक्रम् | १) |
| द्वादशलिङ्गतोभद्र चक्रम् | १)२५ |
| नवग्रहचक्रम् | १)२५ |
| ललितासहस्रनाम स्तोत्रम् | १०) |
| मूलशान्ति भा.टी. | यं. |

प्राप्तिस्थान— मास्टर खेलाड़ी लाल संकटाप्रसाद, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection

Digitized by Sarayu Trust Foundation Delhi and eGangotri.

अस्याः सर्वेऽधिकाराः राज्यशासनानुसारेण प्रकाशकेन स्वायत्तीकृताः

इति

# पञ्चांग पद्धति

—: समाप्ता :—

मास्टर खेलाड़ीलाल संकटाप्रसाद
कचौड़ीगली, वाराणसी

मुद्रक : मास्टर प्रिंटिंग प्रेस, बुलानाला, वाराणसी

CC0. In Public Domain Kirtikant Sharma Najafgarh Delhi Collection